गुरुपीयूषलहरी of केशवानन्द स्वामी with the commentary इन्दुप्रभा of वामनशास्त्री.

Mumbai, 1942 Vikram era.

(9)

1175

Indira Gandhi National
Centre for the Arts

Bill No. 5/07-08

58

2008-057

...bulary. So
inspires new thinking. And this time,
spirited words beginning with V2 that best describe the Indica V2.
Pet

अथ

श्रीमदुदासीनपरमहंसपण्डित-

केशवानन्दस्वामिविरचिता

# गुरुपीयूषलहरी

वामनशास्त्रिविरचितेन्दुप्रभा-

भासिता ।

इयं च

## तदाज्ञया

श्रीकृष्णदासात्मजाभ्यां

गंगाविष्णुखेमराजाभ्यां

स्वकीये

श्रीवेङ्कटेश्वरमुद्रालये

मुद्रिता


**मुंबई.**

संवत् १९४२ शके १८०७.



(इद राजनियमानुसारेण लेखारूढीकृत्यां-

कनकर्त्रा स्वाधीनं कृतम्.)

SANS
294.663
KES

KALANIDHI
Rare Book Collection
Indira Gandhi National
Centre for the Arts
IGNCA
ACC No.: R-517
Date: 26.3.08

DATA ENTERED
Date 25/07/08

# प्रस्तावना.

ॐश्रीगुरुनानकाय नमः ।

सर्वसिद्धिसमर्थाय परात्माद्वैतवेदिने ॥
श्रीमते नानकार्याय त्रैलोक्यगुरवेनमः ॥ १ ॥

पुरा किल कराले कलिकाले दुर्म्लेच्छैस्समुत्पाटितेषु श्रौतस्मार्तकर्मसु दुर्दशां नीतेषु ब्राह्मणक्षात्रधर्मेषु सर्वसिद्धिसमर्थोनर्थकदर्थनकथः श्री गुरुनानको भगवान्भूमौ समवतीर्य सुरैरपि दुष्कराणि कृत्यानि चकार। तस्याचार्यस्य सम्प्रदायानुवर्ती लोकप्रसिद्धपांडित्यपंडितः केशवानन्द नामा यतीन्द्रः शास्त्रपारंगतः कदाचित् १९४०तमे संवत्सरे वाराणसीतः समुत्थाय तीर्थेष्वटन् दक्षिणदेशे समण्डलीकः समाजगाम । तत्र देशे च लोकोत्तरां प्रतिष्ठां शास्त्रचमत्कारहेतुकां त्रिलोकीकीर्तिकरीं प्राप कदाचिच्च श्रीगुरुनानकीयसम्प्रदायानुयायिपण्डितरामप्रकाशेन सतीर्थ्येन प्रेरितः श्रीगुरुनानकस्य प्रसिद्धावतारसामर्थ्यस्य स्तुतिप्रधानां भक्तिज्ञानवैराग्यबोधिनीं कर्णपथमवतरन्तीं चेतश्चमत्कारयन्ती मतिमधुरामस्खलितामलंकारहारावलिललितां गुरुपीयूषलहरीं प्रणिनाय। तदनु च तदाज्ञया सरलाविरलमंजुलानवद्यगद्यपद्यरचनानिपुणो वामनशास्त्री तां गुरुपीयूषलहरीं समुन्मथ्य सत्यार्थभासिकयेन्दुप्रभया भासयांचकार । सेयं सटीका गुरुपीयूषलहरी सूक्ष्मधीकाः सूक्ष्मदृशात्यन्तमानन्दभरिता भविष्यन्तीति भृशमादरणीया विद्वद्भिर्भविष्यति प्रकाशयिष्यति च गुरुवरे मुक्तिपर्यवसायिनीं भक्तिमिति शिवम् ॥

( द्विचत्वारिंशदधिकैकोनविंशशततमेसंवदि )

श्रीकृष्णदासात्मजो
गङ्गाविष्णुः खेमराजश्च ।

Indira Gandhi National
Centre for the Arts

॥ श्रीः ॥

अथ श्रीमदुदासीनपरमहंसपण्डित
केशवानंदविरचिता

# गुरुपीयूषलहरी

श्रीवामनशास्त्रिविरचितेंदुप्रभाभासिता ।

जगत्प्राणोऽप्राणःसततसुखरूपो जगति ना
नकोपीति ख्यातिं प्रथयदमलां ये न चवि
ना। विपन्नानामेकं शरणमिह यन्नाम किल
तं प्रसन्नास्यं वंदे नतसुरतरुं नानकगुरुम्॥ १॥

श्रीहेरंबं सर्वविद्याऽवलम्बं वि-
द्यां चाद्यां चिन्तयन्नेष वन्दे ।
विद्यानन्दे मज्जितच्छात्रवृन्दं
योगानंदांचिद्घनानन्दकन्दम् ॥ २॥

ललितपदां गुरुलहरीमुररीकृतनिजमताशयां
सुखदाम् ॥ नन्दितबुधवरवृन्दो विरचितवान् स्वा
मिकेशवानंदः ॥ ३ ॥

तन्निदेशधृतोत्साहं व्याचिख्यासुमिमां तु मा
म् ॥ शान्तस्वान्ताः प्रकुर्वन्तु हन्त सन्तः कृपाऽऽल
यम् ॥ ४ ॥

दिव्या ध्वन्यर्थभव्याः क्व नवरसमुचः केशवान
न्दवाचः क्वैषा वा मे मनीषा वहति विवरिषांत

Centre for the Arts

त्रयाऽनल्पदोषा । पारावारो ह्यपारः क्व च जरदुडुपं कुत्र तत्रापि पंगुं ॥ शैलं वै लंघयेत प्रभुगुरुकरुणे त्यत्रमेऽस्ति प्रवृत्तिः ॥ ५ ॥

इह खलु सकलागममहाजलधिपारदृश्वा विश्वार्चनीयकीर्तिः स्फूर्तिसमुद्रः पण्डितचन्द्रः श्री केशवानन्दयतीन्द्रः स्वमताशयप्रकाशनपुरस्कारेण जगत्युद्घोषितकीर्त्यानकं श्रीगुरुनानकं स्तोतुकामः सुललितपदाभिधेयवतीं द्विपंचाशत्पद्यविलसितां विविधवृत्तमनोहरां गुरुपीयूषलहरीं प्रणिनीषुः प्राथमिकया सप्तश्लोक्या सुश्लोकयस्य परमात्मैकस्वरूपवतः सर्वात्मनः श्रीसद्गुरोः सकलजागतव्यवहाराश्रयतां प्रदर्शयन् निखिलकारकात्मकतया तं निरूपयति । तत्र चाद्ये पद्ये 'सर्वारंभा हि दोषेण धूमेनाग्निरिवावृता' इत्यादि स्मृतिसूचितान्तरायशंकाकलंकंपरिजिहीर्षुः 'स्मरणं नतिराशीर्वे'तिस्मृत्यादिविहितमंगलविधानमनुसन्दधानः कर्तृकारकत्वेन नानकाभिधानंसद्गुरुमभिष्टुवन् प्रार्थनात्मकं मंगलमाचरति—

यो लीलाधृतविग्रहः सुललितो ला-
भः परो धीमतां यश्चासौ निगमा-
ब्धिपूर्णमथनादाविश्चकाराद्वयम् ।यो

लीनांश्चरणारविन्दयुगुले दीनान् द्द
शाऽमूमुचत् सोऽव्याच्छ्रीगुरुनानको
गुरुवरोऽज्ञानान्धकारापहः ॥ १ ॥

लीलया स्वच्छन्देन धृतो विग्रहः नानकाख्यं वपुर्येन तथाभूतः। अनेन हि प्राकृतजीवानामिव सद्गुरोः कर्मायत्तदेहधारिता निवारितेति भावः यः श्रीगुरुनानक इति कर्तृत्वद्योतनाय प्रथमांतत्वेन निर्देशः। धीमतां विवेकज्ञानसंपन्नानां परः सर्वोत्कृष्टः सुललितः अतिरमणीयश्च लाभः 'यं लब्ध्वा चापरं लाभं मन्यते नाधिकं तत' इति गीतासूक्तत्वात् सद्गुरोश्च परमात्माभिन्नत्वेन प्रतिपादयिष्यमाणत्वाद्युक्तमुक्तंसुललितः परो लाभ इति। यद्वा उपदेशद्वारा जिज्ञासूनामात्मलाभहेतुत्वादाचार्यस्यैव परलाभत्वमुपचारादिति बोध्यम्। पुनश्च योसौ श्रीनानकाभिधो देशिकवरः निगमाब्धेः वेदरूपमहाजलधेः पूर्णात् सारग्रहणांतान्मथनादालोडनात् अद्वयं जीवब्रह्माभेदलक्षणमद्वैतसिद्धान्तं आविश्चकार प्रकटीकृतवान्। तथाहि गुरुग्रन्थनामनि प्राकृतवाग्निबद्धेमहानिबंधे श्रीगुरुनानकश्चतुर्वेद्या अनवद्यमाशयं प्रकाशयांचकारेति तत्संप्रदायिषुसुप्रसिद्धम्। तत्रचाद्वै

तसिद्धांतः स्फुटतया विशदीकृत इति बोध्यम्
यश्च श्रीगुरुः चरणारविंदयुगुले निजपदांबुजद्वये
लीनान् संसक्तान् दीनान् भवज्वरसंतापविदूना
न्तःकरणान् शिष्यानिति शेषः दृशा दर्शनमात्रेणै
व ज्ञानार्पणेनेति वा अमूमुचत् दीनतानिदानभूत
संसारज्वरादतिशयने मोचयामासेत्यर्थः।'तेपुनंत्यु
रुकालेन दर्शनादेवसाधव' इति चात्र प्रसाधकम्।
सः श्रीगुरुनानकः श्रीयते ज्ञानिभिरितिश्रीःमो
क्षलक्ष्मीः तां गृणाति उपदिशतीति श्रीगुरुः स
चासौ नानकः गुरुवरः प्रसिद्धावतारः नानकशब्द
विग्रहस्तु 'अमानोनाप्रतिषेधे'इत्यर्थानुशासनान्ना
ऽव्ययं निषेधवचनं कं सुखं तद्विरुद्धं नकं दुःखं नैक
धेतिवन्नशब्देन समासः अतो न नलोपः नाऽस्ति
नकं दुःखं यस्मिन् स नानकः दुःखप्रत्यनीकसच्चि
दानन्दविग्रह इति यावत्। यद्वा अननमानः आ
न एव आनकः प्राणः स्वार्थिकः कः नास्त्यान
कोस्मिन् स तथा। 'अप्राणो ह्यमनाः शुभ्रो
ह्यक्षरात्परतः पर'इतिश्रुतेः प्राणेन्द्रियादिरूपोपा
धिविहीन इतियावत्। अथवा न विद्यते आनको
वाद्यविशेषो यस्य सः विशेषवाचिना आनकशब्दे
नसामान्यशब्दो लक्ष्यते तथा च यस्य स्वरूपोद्घोष
णविषये न कोपि शब्दः प्रवर्तते सः 'यतो वाचो नि

वर्तते' इत्यादिश्रुतेः। नानकशब्दस्य कूटस्थार्थकत्वं च मूलकृदेव वक्ष्यति 'गुरुनानकना'मेत्यादिना श्लोकेनेति न तत्र प्रयत्यते इति बोध्यम्। अज्ञानं स्वरूपानवबोधः सएवान्धकारः स्वरूपावरणहेतुत्वात् तदपहंतीति तथा उपदेशादिक्रमेणात्मसाक्षात्कारसंपादक इति भावः गुरुषु हितोपदेष्टृषु वरः श्रेष्ठः अस्मान्सकलान्तरायजालात् अव्यात् रक्ष्यादित्यर्थः॥ १॥

द्वितीयश्लोके तस्यैव श्रीगुरोर्नानकस्य कर्मकारकत्वेन स्तुतिं कुर्वाणस्तमभिवादयते--

यं वेदोपि न वेद वेदवपुषं वेदान्तवेद्यं
विभुं यं संतः प्रवदन्ति संसृतिपरं स-
त्यस्वरूपं समं। यं ज्ञातुं मुनयोतितप्त
तनवोऽतप्यंतपस्तन्वते तं वंदे गुरुना
नकं कलियुगे शान्तावतारं शिवम्॥ २॥

वेदः आगमोपि वेदवपुषं वेदशरीरं यं परमात्माभिन्नं श्रीगुरुनानकं न वेद साकल्येन न जानाति। अत्रेयं बृहदारण्यकगता श्रुतिरनुसंधेया 'यो वाचि तिष्ठन्वाचमन्तरो यमयति। यस्य वाक्शरीरं यं वाङ्न वेद स त आत्मान्तर्याम्यमृत' इति ज्ञानस्वरूपमिति वा। कथं पुनस्तस्य ज्ञानं भवतीत्या

कांक्षायामाह वेदान्तवेद्यमिति। वेदान्तैर्वेदशिरोभूताभिरुपनिषद्वाग्भिर्वेद्यं शाखाचन्द्रन्यायेनोपलक्ष्यमिति भावः। विभुं विश्वव्यापिनं। सन्तः तत्त्वज्ञानिनः यं संसृतिपरं सत्यस्वरूपं समं च वदन्तीत्यन्वयः संसृतिः संसारः क्षणविनश्वरश्चतुर्दशभुवनात्मकः पांचभौतिकोऽसज्जडदुःखरूपः प्रपंच इति यावत् तस्याः परं भिन्नस्वरूपं सच्चिदानन्दविग्रहत्वादिति भावः। यद्वा सम्यक् सृतिः भूतानामुत्पत्त्यादिरूपं चलनं यस्मात्तत्संसृति अव्यक्तशब्दवाच्यं प्रधानं जगत्कारणं तस्मादपि परं विदूरवर्तिनम् 'इन्द्रियाणि पराण्याहुरिन्द्रियेभ्यः परं मनः मनसस्तु परा बुद्धि बुद्धेरात्मा महान्परः महतः परमव्यक्तमव्यक्तात्पुरुषः पर' इति श्रुतेः। पुनः सत्यं त्रिष्वपि कालेषु वर्तमानं स्वरूपं यस्येति तथाभूतं समं निर्विकारं च प्रतिपादयंतीत्यर्थः। उक्तं हि परमात्मनः सत्यस्वरूपत्वं श्रीमद्भागवते बादरायणेन यथा 'सत्यव्रतं सत्यपरं त्रिसत्य'मित्युपक्रम्य 'सत्यात्मकं त्वां शरणं प्रपन्ना' इत्यंतेन पद्येन। पुनः अतितप्ततनवः त्रिविधतापैः संतप्तशरीराः मुनयः मननशीला जना यं ज्ञातुं जिज्ञासितुं वृत्तिविषयीकर्तुं वा अतप्यं तप्तुमशक्यं दुश्चरमिति यावत् तपस्तन्वते चरन्ती

त्यर्थः अतितप्ताः पंचाग्निसाधनप्रायश्चित्तानुष्ठा
नादिभिः चित्तशुद्ध्यर्थं संतापिताः तनवो यैस्त
थाभूताः सन्तः तपः कुर्वते इति वा। 'अतप्ततनूर्न
तदामोअश्नुते' इति श्रुतेः। श्रूयते च विविदिषासा
धनत्वं तपसः 'तमेतं वेदानुवचनेन ब्राह्मणा विवि
दिषन्ति यज्ञेन दानेन तपसाऽनाशके'नेत्यादिषु
श्रुतिषु तस्मादुचितमुच्यते यं ज्ञातुं मुनय स्तप
स्तन्वत इति तं पूर्वोक्तविशेषणविशिष्टं कलियु
गे दुरितबहुले चरमकालेपि शान्ता इन्द्रियनिग्र
हरूपशमसम्पन्नः अवतारः अवतरत्यनेनेति अ
वतारः मूर्तिः अवतीर्णविग्रह इति यावत् यस्य
सः तं कामादिभिरक्षुब्धचेतसमिति भावः। उप
देशपरंपरया जिज्ञासूनां महासुखप्रदमित्यर्थः।
शिवं मंगलरूपं आनन्दरूपत्वात् 'मंगलानां च मं
गल' मित्यादिस्मृतिषु तथा प्रसिद्धेश्च। एतादृशं
गुरुनानकं गुरुनानकेतिविशेषाभिधानमादधानं
दैशिकवरं वन्दे प्रणमामि स्तौमि वा। वदि अभि
वादनस्तुत्यो रित्युभयार्थकत्वात्॥ २॥ ॥
अस्मिंस्तृतीयपद्ये कर्तृकरणोभयकारकार्थकतृती
याविभक्त्यंतत्वेन श्रीगुरुं वर्णयन् प्रार्थयते—

येनेदं रचितं हि दृश्यमखिलं संजी-
व्यते लीयते येनेदं स्थिरजंगमं च वि-

विधं व्याप्तं भवद् भासते। येनागः
शतशालिनोऽल्पमतयो ध्येयेन धौताः
कलौ तेन श्रीगुरुनानकेन नितरां गो-
प्यस्त्वयाऽहं गुरो ॥ ३ ॥

येन श्रीपरमात्मरूपेण श्रीगुरुनानकेन क
र्त्रा अखिलं सकलं आन्तरं बाह्यं च दृश्यं जगत् र
चितं निर्मितम्। येन च संजीव्यते सम्यग्जीवनं
प्राप्यते जीवेर्ण्यंतात्कर्मणिलट्। तथा येनैव नि
मित्तभूतेन लीयते लयं प्राप्नोति। अत्र करणे तृ
तीया। पुनः स्थिरजंगमं चराचरं जगत् येन परमा
त्माभिन्नेन श्रीगुरुणा व्याप्तं व्याप्नोतेः कर्मणिक्तः
भवत् मनइंद्रियादिप्रेरकत्वेनाधिष्ठितं सत् भास
ते गोचरतामापद्यते।'यतो वा इमानि भूतानि जा
यन्ते येन जातानि जीवन्ति यत् प्रयंत्याभिसंविशं
ती'त्याद्याः श्रुतयस्तस्य हि परमात्मनो जगज्जन्म
जीवनप्रलयकारणत्वं प्रतिपादयन्तीति शोभन
माभाष्यते येनेदं रचितमित्यादि। अखिलभासक
त्वे च 'यस्य भासा सर्वमिदं विभाती'ति प्रतिपाद
यन्त्यो निगमशिरोवाच एव प्रमाणम्। ध्येयेन ध्या
तुं चिन्तयितुं योग्यः ध्येयः तेन ध्यानविषयीक्रि
यमाणेनेत्यर्थः येन दैशिकवरेण आगःशतशालि

Centre for the Arts

नोऽमितापराधकारिणोपि अल्पमतयोऽल्पा अल्प विषया मतिर्येषां तथाभूता मन्दबुद्धय इत्यर्थः अथ वा अल्पे तुच्छे परिमिते जगति मतिः नैष्ठिकीबुद्धिः येषामिति तथा। परमात्मन एकांशे संस्फुरतां जगतामल्पत्वं श्रुत्योद्घोषितमेव 'नाल्पे सुखमस्ती' त्यादिकया। तेऽज्ञानिनो जना धौताः अपराधाचरण जनितदुरितमलसंक्षालनेन पवित्रीकृता इत्यर्थः। हे गुरो तेन श्रीगुरुनानकेन प्रथमश्लोके व्याख्यात स्वरूपेण गुरुणा त्वया अहं नितरां गोप्यः अत्यंतं रक्षणीयः। अपराधाचरणेऽप्रवर्त्यैव संगोपनीय इति नितरामित्यस्याशयः। 'प्रक्षालनाद्धि पंकस्य दूरादस्पर्शनं वरमि'ति न्यायेन दुश्चरणेष्वप्रवृत्तिरेव प्रार्थयितुमुचितेति भावः ॥ ३ ॥ ॥ ॥

अत्र चतुर्थे पद्ये संप्रदानत्वेन श्रीगुरुमभिष्टौति—

यस्मै यज्ञकृतो हविर्हुतभुजि क्षिप्तं
दिशन्तीन्दते यस्मै निर्जरयक्षराक्ष-
सगणा भीता नमस्कुर्वते ॥ यस्मैस्वं
च समर्पयन्ति यतयो लोकत्रयं बि-
भ्रते तस्मै श्रीगुरुनानकाय सततं
त्रेधा नमो मे सते ॥ ४ ॥

यज्ञान् ज्योतिष्टोमादीन् कुर्वत इति यज्ञकृतः कृञः कर्तरि क्विपि जसंतं रूपमेतत्। यज्ञकर्तारः नानाविधकामनाभिर्निगमप्रचोदितयजनैकनिष्ठाःपूर्वमीमांसका इति भावः। हुतं हौत्रविधिना समर्पितं भुनक्ति सेवते देवताभ्यो विभजनार्थं संगृह्णातीति यावदिति हुतभुग् वन्हिः तस्मिन् क्षिप्तं देवतोद्देशेन त्यक्तं हविः चरु पुरोडाशादि यस्मै पूर्वोक्तस्वरूपाय श्रीगुरवे दिशंति अर्पयन्ति। ननु तत्तद्देवताभक्तास्तास्वनुरक्तचित्तास्ताभ्यो दिशन्ति हविरिति कथमिदमसंगतमुच्यते यस्मै दिशन्तीत्यत आह इन्दत इति। इदिधातोः परमैश्वर्यार्थकाच्छतरि रूपमेतत्। परमैश्वर्यवते इति फलितोऽर्थः। तथाच यज्ञकृतः परमेश्वरायैव कल्पितेन्द्रादिप्रभेदाय ददति हविरिति न कोपि दोषः पदमादधाति।तथाच श्रुतिः'एकं सद्विप्रा बहुधा वदंन्त्यग्निं यमं मातरिश्वानमाहु'रिति। स्मृतिरपि 'अहं हि सर्वयज्ञानां भोक्ता च प्रभुरेव चे'त्यादिका विभिन्नदेवताकानामपि यज्ञानामेकं परमात्मानमेवाग्नियममातरिश्वादिरूपं भोक्तारं प्रतिपादयतीत्युचितमेवोच्यते यस्मै हविर्दिशन्तीति। पुनः निर्जरयक्षराक्षसगणाः देवयोनिविशेषाः भीताः यस्माद्भयमाप्तवन्तः सन्तः यस्मै य

त्संतोषायेति भावः नमः कुर्वते यं प्रणमन्तीत्यर्थः निर्जरादित्रयं अन्यासामपि मानवादिजातीनामु पलक्षकम्। सर्वैरेव परमेश्वराद्भीतैस्तस्य नमस्क्रि यमाणत्वात् । पुनः यतयः परमेश्वरस्वरूपसाक्षा त्कारे यत्नशीलाः संन्यासिनः यस्मै परमात्मैक स्वरूपाय स्वं समर्पयन्ति । यदर्थं स्वत्वास्पदीभूतं ममताकवलितमखिलं दारागारपुत्रादि परित्यज न्तीतिभावः। कीदृशायेत्यपेक्षायामाह लोकत्रयं बि भ्रत इति । लोकानांस्वर्गमृत्युपातालानां त्रयं बि भृते धारयते पोषयते वा । धारणपोषणार्थकाद् भृञः शतरि रूपम् । यद्वा लोक्यन्ते आलोचनवि षयीक्रियन्त इति लोकाः जाग्रदाद्यवस्थाः तेषां त्र यं बिभ्रते परामर्शरूपेण धारयते अवस्थात्रय सा- क्षिणे सततमलुप्तदृष्टये सच्चिद्विग्रहायेति भावः। प्रथितं चावस्थानां लोकत्वं श्रुतिषु 'त्रय इमे लो कास्त्रय आवसथास्त्रयः स्वप्ना' इत्यादिषु निरपेक्षप्र माण्यासुश्रूयमाणत्वात्। तस्मै इति पूर्वोक्त पराम र्शकम् श्रीगुरुनानकायेति व्याख्यातपूर्वम्। सतत मविच्छेदेन त्रेधा द्रष्टृदृश्यदर्शनरूपेण सते वर्तमा नाय नमः प्रह्वीभावोऽस्तु । अथवा सते सद्रूपाय त्रेधा कायिकवाचिकमानसिकरूपेण त्रिप्रकारकं नमनमस्तु ॥ ४ ॥ ॥ ॥ ॥ ॥

अधुना पंचमपद्ये श्रीदैशिकवरमपादानकारकत्वेन निर्दिशति—

यस्माच्चन्द्रमसा विभीतमनसा व्री-
ह्यादि पोपुष्यते यस्माद् भीतमनाः
प्रचण्डकिरणैर्भानुश्च देदीप्यते । य
स्माद् भीतिमितो विवाति विवशो
वातश्च वेवेप्यते तस्माच्छ्रीगुरुना-
नकान् मम मनो ब्रह्माभयं याचते ॥५॥

Centre for the Arts

यस्मात् श्रीनानकशब्दवाच्यात् परमात्मनः विभीतमनसाऽतिभीतचेतसा चंद्रमसा ओषधिनायकेन व्रीह्यादि शालिश्यामाकप्रमुखमखिलमोषधिजातं पोपुष्यते मुहुर्मुहुरतिशयेन वा पुष्यते उपचयार्थकात् पुषेर्यङंतात् कर्मणि लटो रूपमिदम् । च पुनः भानुः सूर्योपि यस्माद् भीतमनाः सन् प्रचंडकिरणैः उग्रैर्मयूखैः देदीप्यते अत्यन्तं प्रकाशते । जीवानां शीतान्धकारनिराकरणाय भगवन्निदेशेन भृशं तपतीति भावः । पुनर्यस्माद् भीतिं भयं इतः प्राप्तः वातो वायुश्च विवशः परवशो भूत्वा सम्यङ् नियतः सन्नित्यर्थः विवाति भुवनोदरे जीवशरीरेषु च प्रचलतीत्यर्थः वागतिगंधनयोरिति गत्यर्थकाददादेः कर्तरि लट् तथा वे

वेप्यते पुनः पुनः कंपते च । उचितं हि भीतस्य कम्पनं लोके तथा दर्शनात् । प्रकृते वायौ कंपस्तु वृक्षादिकंपनलिंगेनानुमीयते । अत्र गम्योत्प्रेक्षा । स्वाभाविके वायोः कंपने भयजन्यकंपस्य तादात्म्यसम्भावनात् । उक्तंच 'संभावना स्यादुत्प्रेक्षा वस्तुहेतुफलात्मने'ति । तस्माच्छ्रीगुरोः नानकात् सकाशात् मम मनः हृदयमभयं भयविरहितमद्वयत्वाद्धिति भावः ब्रह्म याचते भिक्षतेऽर्थयत इत्यर्थः । प्रथितं च परब्रह्मणो निर्भयत्वं श्रुतिषु । 'अभयं वै जनक प्राप्तोसीति' श्रवणात् ॥ अभयरूपपरब्रह्मप्राप्तिस्तु आचार्योपदेशेन तत्कृपया च विना न भवतीति युक्तमाचार्यवरान्नानकादेवाभययाचनम् । 'आचार्यवान् पुरुषो वेदे'त्यादिश्रुतिश्चात्रोपबृंहणम् । अस्मिन् पद्ये 'भीषास्माद्वातः पवते भीषोदेति सूर्य' इत्यादिश्रुतिरर्थतः संगृहीतेति बोध्यम् ॥ ५ ॥ ॥ ॥

इदानीं षष्ठेऽर्थगरिष्ठे पद्ये षष्ठ्याः कर्तृकर्मणोर्वर्तमानायाः कर्तृकारके कर्मणिच क्रमेणांतर्भावाद् गतार्थप्रायायाः संबंधविशेषे वर्तमानायाश्चाकारकत्वादस्मिन् सद्गुरोः कारकात्मकता स्तवप्रस्तावेऽप्राप्तप्रसंगाया अपि सकलकारकसंबंधविशेषबोधविधायिन्याः समुचित एव तस्या इहापरित्याग इ

ति मन्वानः संबंधषष्ठीनिर्देशेन श्रीगुरुं परामृश न् गुरुगीतमाम्नातुं प्रतिजानीते पंडितप्रवरः —

यस्याज्ञानवशाच्चराचरमिदं विश्वं
विचित्रायते यस्यानंदलवं वलंब्य वि-
षयेरक्तोपि मुक्तायते।यस्यापारविशु-
द्धरूपमचलं मुक्तिं ददौ ध्यायते तस्य
श्रीगुरुनानकस्य विमलं गीतं मयाऽऽ-
म्नायते ॥ ६ ॥

यस्य श्रीपरमात्मभूतस्य सद्गुरोरज्ञानवशा दसाक्षात्काराद्धेतोः इदं चरं जंगममचरं स्थावरं च विश्वं जगद् विचित्रायते तत्तन्नामरूपादिविशे षैरनेकतां प्राप्तमिव भातीत्यर्थः ज्ञानिनां त्वाब्रह्म णः पिपीलिकान्ततन्तुषु प्रोताया जगत्साक्षिण्याः संविद एवाहमर्थत्वेन बोधात् सर्वदाप्येकरूपमेव विभाति विविधाकारविराजितमपि जगत् संवि न्मात्रं साम्येन सर्वत्र पश्यतामिति समीचीनमु च्यते यस्याज्ञानवशादित्यादि पुनर्विषये शब्द स्पर्शादौ रक्तः कामुकोपि पुरुषो यस्य परमानंद समुद्रस्यानंदलवं सुखलेशं वलंब्यावलंब्य मुक्ता यते जीवन्मुक्त इवाचरतीति। विषयैकनिष्ठोपि य दीयस्वरूपभूतानंदलवानुसन्धानेन मुक्तिसुखम

नुभवतीत्यर्थः। वलंभयेत्यत्र 'वष्टि भागुरिरल्लोपम
प्योरुपसर्गयो'रिति वचनमनुसृत्याल्लोपघटितं रू
पं बोध्यम्। तथा यस्य अपारमनन्तं त्रिविधपरि
च्छेदशून्यं विशुद्धं च रूपं ध्यायते ध्यानकर्त्रे जाता
वेकवचनम् मुक्तिं स्वरूपावस्थानलक्षणं मोक्षं द
दौ दत्तवदित्यर्थः। अत्र ददाविति भूतकालनिर्दे
शस्तु 'अपाम सोममममृता अभूमे'ति श्रुतिवज्ज्ञे
यः। तृतीयश्लोकस्थतृतीयचरणेन पुनरुक्तिस्तु तत्र
सगुणध्यानस्य पापापाकरणकारणत्वोक्त्याऽत्र च
निर्गुणध्यानस्यान्तःकरणशुद्ध्यनन्तरं मुक्तिप्राप
कत्वोक्त्या भिन्नविषयेति न दूषणमर्हतीति भा
वः। तस्य श्रीगुरोः नानकस्य विमलं दोषरहितं
गीतं तत्संबंधिलीलास्वरूपं गानं मया केशवानं
दनाम्ना तत्संप्रदायानुयायिनाऽऽम्नायते वर्ण्यत इ
त्यर्थः। अत्र 'तस्यैवाऽऽनन्दस्यान्यानि भूतानि मा
त्रामुपजीवंती'त्यादिश्रुतिरनुसंधेया॥ ६॥ ॥

अथास्मिन् सप्तमे चोत्तमे पद्येऽधिकरणकार
कत्वोक्त्या श्रीगुरुमुल्लिखति—

यस्मिन्नस्ति न वेति शब्दरचना केना-
पि नो नीयते यस्मिन् योगिजनैश्च
निश्चलतरं चित्तं समाधीयते। य-

स्मिन् मग्नविनीतभीतमनसा सारा-
मृतं पीयते तस्मिञ्छ्रीगुरुनानके हि
मनसा शान्तिः समाश्रीयते ॥ ७ ॥

यस्मिन् प्रागुक्तस्वरूपे सद्गुरौ अस्ति वा नास्ति इत्येवमाकारा शब्दरचना शब्दप्रक्रिया केनापि वक्तृविशेषेण नो नीयते न प्राप्यते किन्त्वस्मीति शब्द एव तस्मिन् ब्रह्मरूपे गुरौ प्राप्यते अस्तीतिश ब्दप्रयोगे हि जीवाद्भिन्नत्वं भवेत् तच्च न शक्यं शक्रेणापि निरूपयितुं 'स आत्मा तत्त्वमसी' त्यादिश्रुतिशतविरोधाद् अतएव श्रुतावप्यहं 'ब्रह्मास्मी' त्यत्रास्मिशब्द एव प्रयुक्तः 'अस्तीत्येवोपलब्धव्य' इति श्रुतावस्तिशब्दस्तु नास्तित्वनिराकरणपर एव बोध्यः। च पुनर्यस्मिन् उक्तरूपे योगिजनैः 'योगश्चित्तवृत्तिनिरोध' इति पतञ्जल्युक्तस्वरूपस्तद्वद्भिर्नरैः 'यतो यतो निश्चराति मनश्चंचलमस्थिरं ततस्ततो नियम्यैतदात्मन्येव वशं नयेदि' ति शास्त्रोक्तविधिमनुतिष्ठद्भिर्निश्चलतरमतिनिश्चलं चित्तं समाधीयते संम्यक् सर्वत आकृष्य स्थाप्यत इति भावः। च पुनस्तैरेव योगिभिः कर्तृभिर्यस्मिन् मग्नमत एव विनीतं सुशिक्षितं भीतं च परित्यागादितिशेषः संसाराद्वा तच्च तन्मनस्तेन कृत्वा सारामृतं सारभू

तं यदमृतं स्वानंदरूपं पीयते उत्कंठया सेव्यत इत्यर्थः। अत्र ब्रह्मानुभवात्मकसारामृतपाने योगिजनानां कर्तृत्वं मनसश्च तत्र करणत्वं वर्णयितुं शक्यते। एवं हि चोपि सुलग्नो भवतीति बोध्यम्। तस्मिञ्छ्रीगुरुनानके मनसा हृदयेन ममेत्यध्याहारः शांतिर्निश्चलता समाश्रीयते लभ्यते। तस्मिन्नेव मम मनः स्वभावान्निश्चलत्यमवलंब्य तिष्ठतीति भावः। एवमाद्यं पद्यमुपक्रम्य शांतिः समाश्रीयते इत्यन्ते पद्यसप्तके सप्तविभक्तिनिर्देशेन श्रीगुरोरखिलकारकात्मकत्वं प्रतिपादितमित्यव गन्तव्यम्।

स्वस्ति श्रीगुरुनानको विजयते वंदे गुरुं
नानकं गोप्योऽहं गुरुनानकेन सततं श्रीना
नकायोंनमः॥ नान्यो मे गुरुनानकाद् गुरु
वरः श्रीनानकस्यस्यास्म्यहं दासः सद्गुरुना
नके मम रतिस्त्रायस्व मां नानक॥ १॥

एतावत्पर्यन्तं शार्दूलविक्रीडितं वृत्तं तल्लक्षणं तु 'सूर्याश्वैश्च मसौ जसौ च ततगाः शार्दूलविक्रीडितमिति॥ ७॥

एवं सप्तश्लोक्यां श्रीगुरुं सप्तविभक्तिभिर्निर्वर्ण्याधुना वृत्तान्तरमाश्रित्य तमेव सम्बोधयन्नभिमतं प्रार्थयते—

असारसंसारसमुद्रविभ्रमे भ्रमन् म-
नो मे बहुदुःखदुर्दशम्। तरंगभंगैर्वि-
षयेषु संगमैः कदा कृपालो करुणां क-
रिष्यसि ॥ ८ ॥

असारः परिणामे विरसत्वान्निःसारो यः संसारसमुद्रो भवार्णवः कामक्रोधादिमहाग्राहाकुलितत्वादज्ञानिनामतिदुस्तरत्वाच्च सूचितमेव संसारस्य समुद्रत्वम्। तस्य यो विभ्रम आवर्तस्तत्र भ्रमद् भ्राम्यन् मे मनः तरंगाणामिव भंगः क्षणविनाशित्वं येषां ते तरंगभंगा लहरीवदतिचंचला इति भावस्तैर्विषयेषु शब्दादिभोग्यवस्तुषु संगमैरासक्तिभिर्हेतुभूताभिर्बहुदुःखदुर्दशं दुःखैर्या दुर्दशा सा दुःखदुर्दशा दुःखभोगनिमित्ता दुःखस्येति यावत् बह्वी दुःखदुर्दशा यस्येति तथाभूतमस्ति। समुद्रसंभ्रमद्भ्रमादिति पाठे अपारसंसारसमुद्रसंभ्रमदिति मनसो विशेषणं ज्ञेयम्। तत्र च 'सप्तमी'ति योगविभागात् 'सहसुपे'ति वा सप्तमीसमासः। भ्रमादिति स्पष्टम् भोः कृपालो श्रीनानक एवं दुरवस्थे मयि करुणां दुःखमोचनेच्छारूपां दयां कदा करिष्यसि। द्राक्कुर्वित्याशयः। वंशस्थं वृत्तमिदम्। तल्लक्षणं वृत्तलाघवे 'जतौ तु

वंशस्थमुदीरितं जरा'विति ॥ ८ ॥ ॥

ननु शरण्यान्तरमाश्रीयतां किं ममैव करुणा प्रार्थनेनेत्याकांक्षायामाह—

जगत्त्रयत्राणविधौ धुरंधरं तवांघ्रिफु-
ल्लांबुजमेव सेवते। परं प्रतीकारम-
पास्य मे मनः शरण्यमन्यं च तृणा
य मन्यते ॥ ९ ॥

मे मम मनश्चित्तं परमन्यं प्रतीकारं दुःखदुर्दशापरिहरणोपायमपास्य परिहृत्य जगत्त्रयस्य त्राणं रक्षणं स एव विधिः कृतिस्तस्यां धुरंधरं धुरीणं जगत्पालकानां विष्णुशक्रप्रमुखानामग्रेसरमिति भावः तवांघ्रिफुल्लांबुजं चरणरूपं प्रफुल्लारविंदमेव कर्मभूतं सेवत आश्रयते। च पुनरन्यं शरण्यं शरणे रक्षणे साधुरिति शरण्यो रक्षकः 'तत्र साधु'रिति यत्प्रत्ययः तं तृणाय मन्यते तृणवत् तुच्छं गणयतीत्यर्थः 'मन्यकर्मणी'त्यादिना चतुर्थी। अतस्त्वत्करुणोदयमन्तरा पालकान्तरात्सान्तरायसुखलिप्सुर्नायमनन्यलंपटो मम मनोलिरिति त्वयैव कृपालुना प्रतिपालनीयोऽयं जन इति भावः॥९॥

एवमन्यं शरण्यमवगणयतो मानसस्याचार्यैकप्रवणतां वर्णयति—

यतीन्द्रचित्तैकचकोरजीविकां समस्त-
सन्तापहरां मनोहराम्। अबोधरात्रौ
मम मानसं मुहुः प्रतीक्षते ते मुखच-
न्द्रचन्द्रिकाम् ॥ १० ॥

मम मानसं मनः कर्तृ अबोधः स्वरूपानवबोधः स एवाऽऽवरकत्वसाम्यादनालोकाद्वा रात्रिस्तस्यां यतीनां परमार्थसिद्धौ प्रयत्नशीलानां परमहंसानां य इंद्राः श्रेष्ठास्तेषां चित्तान्येवैकेऽनन्याश्चकोरास्तेषां जीविकां जीवनकर्त्रीं समस्तो निःशेषः संतापः संसारदावानलदाहस्तं हरत्यपाकरोतीति समस्तसन्तापहरा तां पुनर्मनोहरामातिरमणीयां ते तव श्रीगुरोर्मुखचन्द्रचंद्रिकां मुखमेव चंद्र आल्हादकत्वात् तस्य चन्द्रिकां ज्योत्स्नां मुहुर्वारंवारं प्रतीक्षते प्रतिपालयते कदा समुदियादिति समुत्सुकं तिष्ठतीति फलितोर्थः । अत्र परंपरितं रूपकमलंकारः तल्लक्षणमुक्तं मम्मटेन 'नियतारोपणोपायः स्यादारोपः परस्य यः तत्परंपरित'मिति ॥ १० ॥ ॥ ॥ ॥ ॥

अत्रैकादशे पद्ये आत्मनि श्रीगुरोः करुणानयनकटाक्षपातम्प्रार्थयमानो वर्णयते—

सतां मुखाब्जानि विकासयन्नय-

म् जगत्त्रये चापि विभासयन्नयम्।
कदा मदज्ञानविभावरीसुतं हरिष्यति
त्वन्नयनारुणो द्रुतम्॥ ११ ॥

अयं त्वन्नयनारुणस्तव नयनं तदेवारुणो ऽज्ञानांधकारानिरसनपटुत्वात् सूर्यः 'मिहिरारुणपूषण' इतिकोशाद् मदज्ञानविभावरीसुतं मम यदज्ञानं देहोहमित्यध्यासहेतुः स्वरूपानवबोधः तदेव विभावरीसुतोऽन्धकारः तं रात्रौ सत्यां तमसः सद्भावाद् विभावरीसुतमित्युपचर्यते तमासि रात्रिपुत्रत्वमिति भावः। कदा कस्मिन् काले द्रुतं शीघ्रं हरिष्यति नाशयिष्यतीत्यर्थः । सूर्यत्वारोपोपायभूतं नयने विशेषणद्वयमुपक्षिपति सता मित्यादि। सतां सज्जनानां मुखान्येवाब्जानि कमलानि विकासयन् हासयन् पुनःकीदृश इत्यपेक्षायामाह जगत्त्रये नयं अनुष्ठेयकर्मसु प्रवृत्तिलक्षणां नीतिं विभासयन् प्रकाशयन्। अत्र पूर्वोक्तरूपकस्य यमकाख्यशब्दालंकारेण सह संकरः। यमकलक्षणं तु चंद्रालोके 'आवृत्तवर्णस्तबकं स्तवकन्दांकुरं कवेः यमकं प्रथमा धुर्य्यमाधुर्यवचसो विदु'रिति॥ ११ ॥ ॥ ॥ ॥ ॥

अधुना स्वमत्या अनन्यनिष्ठतां प्रकटयति–

बलिष्ठकामादिभिरातुराऽसती गरि-
ष्ठगर्वादिभिराकुला सती । अपास्य
सा त्वां निरपत्रपा सती मतिर्मदीया
वद कं वरिष्यति॥ १२ ॥

सती स्वभावतः शुद्धा मदीया ममेयं मतिर्बुद्धिर्बलिष्ठैरतिप्रबलैः कामादिभिः कामो विषयाभिलाषस्तत्प्रमुखैः षड्भिरूर्मिभिः क्रोधलोभमोहमदमत्सरा आदिशब्देन गृह्यंते आतुरा पीडिताऽत एवाऽसतीअसदाग्रहशीला गरिष्ठाऽतिदृढा ये गर्वादयस्तैर्विद्यादिगुणैरात्मनि गरिमबुद्धिर्हि गर्वः अत्रादिशब्दन पराभिभवाकांक्षादयो ग्राह्याः कामशब्दसहभूतेनादिना संगृहीतेषु क्रोधादिषु प्रसिद्धेन मदशब्देनैव गर्वादीनां ग्रहणसंभवेऽपि तत्राध्यात्मविषयतया नैसर्गिको देहोऽहमित्यादिरूपो मदोऽवधेयः अत्र तु विद्याध्ययनादिजनितः कार्यस्वरूपो महत्त्वबुद्धिरूपो गर्वशब्देनाभिधेय इति न पुनरुक्तिः शंकनीया । आकुला व्याप्ताऽत एव निरपत्रपा निर्लज्जा च सती भूत्वेत्यर्थः प्रसिद्धं हि सर्वत्र कामाद्यातुराणां लज्जाविकलत्वं 'कामातुराणां न भयं न लज्जे'ति घुष्टघोषणात्।यद्वा अपगता त्रपा अपत्रपा निर्लज्जता सा

निर्गता यस्याः सा निरपत्रपा तथा च लज्जावती स ती सा त्वां सज्जनमुखाब्जविकासकं जगत्त्रयनयवि भासकमज्ञानतिमिरपरिहरणनिपुणसकरुणनय नारुणं श्रीदैशिकवरमपास्य त्यक्त्वा कं त्वदितरं कं वा वरेण्यं शरण्यं वरिष्यति भजिष्यति वद तं ब्रूहि को वा जगति त्वदपरस्तादृग्गुणो यमेषा मे मति र्वृणुयात्तं कथय। नास्त्येव तथाविधः कोपीति भावः॥ १२॥

एवं पंचभिर्वंशस्थवृत्तैः स्वबुद्धेरनन्यनिष्ठा या आचार्यैकप्रवणतां प्रतिपाद्येदानीं शिखरि णीवृत्तमाश्रित्य नवाभिः पद्यैः श्रीनानकगुरुं स्तोतु मारभते——

स्वतः शुद्धं बुद्धं मतिगतिपरं वागवि-
षयं निराकारं सारं भवजलधिपारं
निरुपमम्।अमन्दानन्दं चिद्घनमच-
लमाद्यन्तरहितं नमामस्तं नित्यं सुर-
नरनतं नानकगुरुम्॥ १३॥

वयं सुरनरनतं सुरैर्देवैरिन्द्रादिभिर्नरैर्मानवै श्च नतं वन्दितं नानकगुरुं पूर्वोक्तस्वरूपं नानका भिधानं दैशिकश्रेष्ठं नमामो वंदामहे। अत्र बहुव चनं सामाजिकाभिप्रायेणेति बोध्यम्। कीदृशं गुरु

मित्याकांक्षायामाह स्वतःशुद्धमित्यादिना । स्वतः स्वरूपतः शुद्धमीषन्मात्रेणापि भेदकलंकेनासंस्पृष्टमितिभावः पुनः बुद्धं ज्ञानस्वरूपं 'सत्यं ज्ञानमनन्तमि'तिश्रवणात् मतिगतिपरं मत्या बुद्धेर्गतिःप्रवृत्तिस्तस्याः परमविषयमित्यर्थः 'यो बुद्धेः परतस्तु स' इति स्मृतेः पुनः वाचां पश्यन्ती मध्यमावैखरीति भिन्नपदैर्व्यवन्हियमाणानां वाणीनामविषयमगोचरं तिसृभिरपि वाग्भिरग्राह्यमिति भावः । 'यतो वाचो निवर्तन्ते अप्राप्य मनसा सहे'ति श्रुतेः । वाग्बुध्यगोचरत्वे हेतुं वदन् विशिनष्टि निराकारमिति केनाप्याकारेणामूर्तं निराकारं ज्ञेयाकारमेव स्थूलसूक्ष्मं पदार्थं वाग्बुद्धयोहि विषयीकुर्वन्ति नत्वाकारमात्रविवर्जितमित्युचितमेवाभिहितं मतिगतिपरमित्यादि । एतादृशस्य नमने प्रयोजनं वदन् पुनर्विशिनष्टि सारमिति परमार्थभूतत्वात् सर्वोत्तममिति सारपदस्यार्थः । ननु वाङ्मतिगतिपरस्य ज्ञेयाकारविकलस्य च कथमुच्यते सर्वोत्तमत्वमित्याशंकां निराकुर्वाण आह भवजलधिपारमिति भवति निरवयवनिश्चलैकसच्चिद्विग्रहे उत्पद्यत इति भवोऽहंकारः देहोऽहमित्याकारकः स एव जलधिः जलानि डलयोः सावर्ण्याज्जडानि धीयन्तेऽस्मिन्निति जल

Indira Gandhi National Centre for the Arts

SANS
294.663
KES



धिः सकलाचित्समूहाश्रय इति यावत् भवजल धिरि'त्युपमितंव्याघ्रादिभि'रित्यनेनाकृतिगणत्वा त्समासः। तस्य पारंपरतो वर्त्तमानमाश्रयत्वादि ति भावः अत्र ह्येतदुक्तं भवति अहंकारायत्तं हि सकलमवस्थात्रयावलंबितं जागतं वस्तुजातम्। स चाहंकारो यदि सर्वैर्मूढविद्वद्भिः सारत्वेनाभि प्रेयते तदा किमु वाच्यं यमाश्रित्यासाववस्थात्रय भुगहंकारः प्रवर्तते तस्यावस्थात्रयसमुदयलयसा क्षिणोऽव्ययरूपस्य परात्मनः सर्वोत्तमत्वमिति भावः। तदेव सर्वोत्तमत्वं स्पष्टयति निरुपमं के नाप्युपमानेनानुपमेयमित्यर्थः। सारत्वे हेतुगर्भं विशेषणमाहामंदानंदमिति। अमंदः सर्वश्रेष्ठः स कलानंदसोपानपरंपराशेखरीभूत इति भावः य आनंदस्तं परमानंदस्वरूपमिति कर्मधारयः'एष ह्येवानन्दयाती'त्यादिश्रुतेः'सैषानन्दस्यमीमांसे' ति श्रुतेश्च मीमांसा सीमाऽवधिरितियावत्। पुनः कीदृशमित्याकांक्षायां त्रिप्रकारेण विशिनष्टि चि द्घनमचलमाद्यन्तरहितमिति। चिता ज्ञानेन घनं सान्द्रं। अचलं कूटस्थं निर्विकारमिति यावत्। आ द्यंतरहितंउदयास्तविरहितं। त्रिपुटीकलंकरहिता खंडितज्ञानैकविग्रहमितिविशेषणत्रयस्यार्थः॥१३

अत्र स्वस्य संसृतिचक्रपरिभ्रमणजन्यं दुःखा



IGNCA RAR
ACC. No. R-517

तिशयं निवेद्य तस्माद्विमुक्तिरूपां महाशांतिं कैवल्यलक्षणां प्रार्थयते—

अहं भूयो भूयो भवहुतभुजादग्धमन-
सा भवे भ्रामंभ्रामं धृतिविगलितो
दुःखिततनुः। कदा पूर्णानन्दामृतम-
यमहाब्धौ प्रपतितो महाशांतो हि
स्यां तव करुणया नानकगुरो ॥१४॥

भो नानकगुरो नानकशब्दवाच्य श्रीगुरो अहं दग्धं मनोविचारशीलमंतःकरणं येन तेन भवहुतभुजा भवः पूर्वोक्तस्वरूपोऽहंकारः स एव तापहेतुत्वात् हुतभुग् ज्वलनस्तेन भूयोभूयः पुनःपुनर्दुखिता दुःखं प्रापिता तनुर्यस्य स तथाभूतः 'सुप्तेदमि न दृश्यंते दुःखदोषप्रवृत्तयः।तस्मात्तस्यैव संसारो न मे संसर्तृसाक्षिण' इति लक्ष्मीधरोक्तेर्युज्यतेऽहंकारस्य सकलसांसारिकदुःखनिदानस्य हुतभुक्त्वनिरूपणम्। इंद्रियगणेन हुतान् स्वस्वविषयान् शब्दादीन् भुनक्ति स हुतभुगिति व्युत्पत्त्या 'समीचीनतरो ह्यत्र भवदवशिखे'त्यादिलालित्यमकटाक्षयित्वा सर्वोपभोक्तुरहंकारस्य हुतभुक्शब्दप्रयोगः। अत एव धृतेर्धैर्यात् गमिष्यंति दुःखानि। द्रक्ष्यंते च महासुखपर्वाणि समाश्वसिहि चे

तः इत्येवं लक्षणात् समाश्वासाद्विगलितः परि भ्रष्टोऽहं तव केवलब्रह्मोपदेष्टुर्दैशिकवरस्य करुण या चित्तप्रसत्तिरूपया पूर्णः 'पूर्णमदः पूर्णमिदंभू मा वै सुख' मित्यादि श्रुतिप्रतिपादितः अविच्छि न्नो य आनंदः स एवामृतमविनाशित्वात् तन्मय स्तद्रूपः स्वार्थेमयट् महाब्धिर्महार्णवस्तस्मिन्प्रपति तो निमज्जितः सन् आदिकर्मणिक्तः महाशांतः 'तेषांशान्तिः शाश्वतीनेतरेषा' मितिश्रुत्युक्तशांति विशिष्टः सकलदुःखोपशान्तिलक्षणामखंडितां कै वल्यदशां प्राप्त इति फलितोर्थःकदा कस्मिन् काले स्याम् भवेयम् अस्तेः प्रार्थनायां लिङ्। ईदृशस्य मे दुःखप्रणाशपूर्वकं महानंदावाप्तये कदा दयां करिष्यसीति भावः ॥ १४ ॥

ननु श्रुतिस्मृतिविहितकर्माचरणपुरःसरं य मनियमादियोगांगानि श्रवणादीनि ज्ञानसाधना नि च त्वया यद्यनुष्ठितानि स्युस्तर्हि ते मुक्तिपदवा च्यां महाशान्तिमपि दास्यामि किमेतावता अना श्वासेनेतिचेत्तत्राह—

नवै श्रौतं स्मार्तं नतु नियमनं नापि य
मनं न च प्राणायामं श्रवणमननं सं-
यमशतम्। अकार्षं नो नानासनविर-

चनां देहदमनां कृपां स्वामाश्रित्य
प्रदिश भगवन् मुक्तिममलाम्॥१८॥

अहं श्रौतं श्रुतिप्रचोदितं अग्निष्टोमादिस्मार्तं स्मृतिविहितं नित्याग्निहोत्रादि वै निश्चयेन नाकार्षं नाकरवामिति सर्वत्र संबध्यते। तथा च नियमनं शौचतपआदि यमनं अस्तेयापरिग्रहादि प्राणायामं च पूरकरेचकादिभिः प्रकारैः प्राणनिरोधनं च नाकार्षमित्यन्वयः तथा च श्रवणं गुरुमुखाद् वेदांतोपनिषदाकर्णनम् मननं श्रुतार्थानां पुनःपुनरनुचिंतनं तच्च तच्चेति समाहारद्वंद्वः तथा च संयमो मनइंद्रियाणां निग्रहः तत्र यच्छतं उपायानामिति शेषः यद्वासंयमानां मनोनिग्रहसाधनानां यत् शतं तदित्यर्थः तथा च देहदमनां शरीरक्लेशकरीं नाना भूतानामासनानां स्वस्तिकपद्मकादीनां रचनां संविधानं च नोऽकार्षम्। अत्र हि यमनियमासन प्राणायामप्रत्याहाराख्यानि तथा श्रवणमननादीनि योगज्ञानसाधनानि मया नैवानुष्ठितानीति स मुच्चितोऽर्थः तर्हि किं ते सुकृतमाश्रित्य मया ते मुक्तिः प्रदेयेति चेत्तत्राह। कृपामिति। हे भगवन् 'उत्पत्तिं च विनाशंच भूतानामागतिं गतिं। वेत्ति विद्यामविद्यांचे'त्यादि प्रसिद्ध ज्ञानैश्वर्यसंपन्न स्व

स्वकीयां छात्राचरणानिरपेक्षां केवलां कृपां दीनदुःखापाकरणबुद्धिलक्षणामाश्रित्य अमलां निष्कलंकां भृत्यसेवानुसंधानेनाजायमानां निर्हेतुकामिति भावः इति कृपाया विशेषणम् यद्वा अज्ञानभेदादिमलसंपर्करहितां मुक्तिं कैवल्यादिशब्दवाच्यां स्थितिं मे मह्यं प्रदिश देहि ॥ प्रार्थनायां लोट् ॥ १५ ॥

अधुना ममाचारं विचार्य दातुमिच्छसि चेन् ममापात्रता तव च कीर्तिविरहः प्रसज्येतेत्याशयेनाह—

विचार्याचारं चेत् त्वमपि दिशसि प्र-
त्यगभयं ह्यखंडं चिन्मात्रं विगलितभ
वंसत्यमनघं। वरं निर्वाणाख्यं शिव-
शिव विनेयाय भगवन् तदा ते माहा-
त्म्यं दिवि भुवि कथं विस्मृतिमियात् १६

हे भगवन् ऐश्वर्यसंपन्न श्रीगुरो त्वमाचारं विचार्य मद्वर्तनं पर्यालोच्य प्रत्यक् प्रत्यगात्मरूपं अभयं अद्वयत्वाद् भयरहितं 'द्वितीयाद्वै भयं भवती'ति श्रवणात्। हि प्रसिद्धं अखंडं वस्तुतो देशतः कालतश्च परिच्छेदशून्यं चिन्मात्रं चिदेव चिन्मात्रं ज्ञानैकस्वरूपं विगलितभवं अहमादिदेहांतप्रपंच

तीतंस त्यंत्रिकालाबाध्यं अनघं अज्ञानादिकलंकर हितं वरं वरणीयं सर्वश्रेष्ठमिति वा निर्वाणाख्यं मो क्षाभि धानं पदमितिशेषः निर्वाणाख्यं वरमितिवा योज्यम्। विनेयाय शिष्याय मे मह्यं दिशसि चेद्य दि दास्यसीत्यर्थः तदा तर्हि तव माहात्म्यं दर्शना दिमात्रेणैव श्रीगुरुः संसारसंकटादुन्मोचयति प्रण तमित्येवंरूपं महात्मत्वं कीर्तिमत्त्वमिति भावः दि वि स्वर्गेभुवि मर्त्यलोके च कथं विस्तृतिं विस्तारमि यात् प्राप्नुयात् नैव माहात्म्यविस्तारः स्यादिति ता त्पर्यार्थः आचारानुरूपदानक्षमा अधिकारियजना दिकांक्षिणश्चान्यदेवाः सन्त्येव जगति। किंतु ते क र्मायत्तवरदानतत्पराः भवाञ्छ्रीगुरुस्तु परमकारु णिकत्वाद्दर्शनमात्रेणैव सेवादिकमनपेक्ष्य ददासि विनाशविहीनं कैवल्यमिति प्रसिद्धिस्त्वेवमाचरणे सर्वथाऽस्तमियात्तस्माद्विचार्यैव ममाचारं निर्वा णपदं देहीति फलितोर्थः ॥ १६ ॥ ॥

नन्वेवं चेद्देशिकान्तरं संसेव्यतां किं ममैवं नि र्बंधेनेति चेत्तत्राह—

अनेक ब्रह्मांडे कतिपयजनाः सन्ति
गुरवो भवत्तुल्यं नैकं जगति कलया-
मि ध्रुवमहम्। अधर्मिष्ठान् जन्तूंस्त्व-

मयि करुणागार कृपया समुद्धर्तुं य-
स्माद् धृततनुरतो ऽभूरतुलनः॥ १७॥

अनेकानां ब्रह्मांडानां समाहारो ऽनेकब्रह्मांडं तस्मिन् समाहारत्वादेकवचनम् नानाभुवनेषु कतिपयजनाः कतिचिन् नराः गुरवो गुरुत्वविशिष्टाः परमार्थविषये उपदेशकाः सन्ति वर्तते। तथापि ध्रुवं निश्चयेनाहं भवत्तुल्यं भवताऽद्वयमार्गप्रकाशकेन त्वया श्रीनानकेन तुल्यं तुलनार्हं जगति नानाब्रह्मांडमालासमाकुलेऽस्मिँल्लोकसमूहे एकमपि न कलयामि न गृह्णामि न जानामीति पर्यवसितोर्थः कुत इत्याकांक्षायामाह अधर्मिष्ठानिति हे करुणागार भोः कृपालययस्मात् कारणादधर्मिष्ठान् पुण्याचरणविहीनान् पापानुष्ठाननैष्ठिकानिति वा जंतून् जीवान् समुद्धर्तुं संसारदुस्तरसागरादुत्तारयितुं कृपया करुणामात्रेणैव त्वं धृततनुर्गृहीतावतारः अभूः भवतेर्लुङ् अतो हेतोस्त्वमतुलनः केनापि तुलयितुमयोग्योसीति भावः। अन्ये गुरवस्तु प्रपन्नानां मनुजानां वर्णाश्रमोचितसदाचरणशीलानां च यथाधिकारमुपदेशकुशला वर्तंते त्वं त्वनधिकारिणोप्युद्धर्तुं लीलागृहीततनुरसीत्यहो ते निर्व्याजं निरपेक्षं च कारुण्यमिति तात्पर्यार्थः॥ १७॥

अत्र हि तत्तच्छास्त्राध्ययनेन गृहीताधीतसि

द्धान्तानामेकनिष्ठानां तु भवेत्तत्तद्विषयाचार्यानुसरणेन प्रयोजनसिद्धिर्मम पुनर्विविधमतिग्रहाकुलितस्य नास्त्येव भवन्तमन्तरा निरन्तरायः पंथा इति प्रार्थयते—

विधिं मीमांसन्ते कतिचन रता जैमिनिमते परे सांख्ये शास्त्रे प्रकृतिपरयोर्भेदभजनाः। इतोऽन्ये योगादौ विमलमतयो द्राग्गतिमिताः परन्तु त्वत्तो मे जगति गतिरन्या न विमतेः॥ १८॥

Indira Gandhi National Centre for the Arts

कति चन के चित् शबरकुमारिलप्रमुखाः कर्मैकनिष्ठा इति यावत् जैमिनेः पूर्वमीमांसाचार्यस्य मते अभिमतसिद्धान्ते रताः परमार्थधिया संसक्ताः सन्तः विधिं वेदोदितविधानम् इदं जात्येक वचनम् नानाविधानपूर्वनियमपरिसंख्यारूपान् विधीनित्यर्थः मीमांसन्त विचारयन्ते निगमोक्तविधिविचारणपुरःसरं यागाद्यनुष्ठानेनैव ते कृतकृत्यमात्मानं मन्यन्त इति न तैः सद्गुरूपसत्त्यादिकमपेक्ष्यत इति भावः परे ततोऽन्ये कापिलादयः सांख्ये तन्नाम्नि तत्त्वप्रसंख्यानपरे शास्त्रे रता इत्यनुषज्यते प्रकृतिपरयोः प्रकृतिपुरुषयोर्भेदं भजं

ति स्वीकुर्वन्ति ते भेदभजनाः कर्तरिल्युट् पुंस्प्रकृ
त्योर्भेदवादिनो भवन्तीति शेषः इत एभ्योऽन्ये
विमलमतयः तीव्रप्रज्ञाः द्राक् शीघ्रं योगादौ
योगश्चित्तवृत्तिनिरोध इति पतंजल्युक्तस्वरूपः स
आदिर्यस्य सयोगादिरखिलसाधनकलापस्तस्मि
न् गतिं ज्ञानं गम्यं फलं वा इताः प्राप्ताः परंतु
विविधा मतिर्यस्य तस्य नानाविधशास्त्राध्ययनपां
डित्यव्यसनव्यग्रत्वादनेकाकारबुद्धिवृत्तेरितिभावः
मे मम जगति त्वत्तोऽन्या गतिः शरणमुपायो वा
न विद्यत इति शेषः अत्रायमभिसन्धिः के चिदेक
निष्ठाः किंचिदेकमेवोररीकृत्यात्मानं कृतकृत्यं म
न्यन्ते केषां चिदुपशान्तचित्तानां मनोजयादौ च
प्रवृत्तिरनायासेन शीघ्रं च प्रजायते मम तु प्रख्या
तपांडित्यप्रतिष्ठितस्य कदाचिन्न्यायं विदूषयतो
व्याकरणं च विभूषयतो जातुचिदुभयं खंडयि
त्वा वेदान्ताडम्बरं मंडयतश्च केवलं सभाजया
भिनिवेशवतो नैकनिष्ठस्य कैवल्यगतिप्रदः केव
लं त्वमेवासीत्यवश्यं मह्यमभयगतिं दिशेत्या
शयो श्लिष्यतेतराम् ॥ १८ ॥

अत्रहि प्रार्थनीयस्य श्रीगुरोर्जन्ममृत्युपरंप
रारूपसंसारसागरोत्तारकत्वं भंग्यंतरेण प्रतिपाद
यन्नाह—

यदारभ्य स्वामिंस्त्वमिह जगति प्रा-
दुरभवस्तदारभ्यैवाभूद् गुरुवर य-
मो निश्चलमनाः । यथा सीतानाथे
भुवि समवतीर्ण मुनिहिते कुठारं हि-
त्वाऽभूद्धरिपरशुरामोचलमनाः ॥१९॥

हे स्वामिन् नाथ गुरुवर श्रीनानकसद्गुरो इह अस्मिन् जगति त्वं यदारभ्य यत्कालप्रभृतिप्रादुरभवः तनुधारणे प्रकटीभूतः तदारभ्य तत्कालात् सकाशात् यमः कृतांतः निश्चलमनाः स्वस्थचित्तः समाधिनिष्ठ इति यावत् अभूत् भवतेर्लुङ् त्वया तत्त्वोपदेशरसिकेन प्रणतानां जननमरणरूपभवजालपरिहरणाद्धेतोर्लोकमारणव्यापारव्यसनविरहितयाऽव्यग्रमानसः शं मनः समपद्यतेति भावः तत्र दृष्टान्तमुदाहरति यथेति । मुनीनां हित आप्तः तेषां मखविघ्ननिवारणेन संपादितसमीहितत्वात् स्वजनतां प्राप्त इति तात्पर्यार्थः तस्मिन् सीतानाथे जानकीनायके श्रीरामचन्द्रे भुवि भूलोके समवतीर्णे कृतावतारे सति क्षत्रियसंहरणकर्मा हरिः परशुरामः कर्मधारयः समासः परशुप्रधानत्वादेवं निर्दिष्टो भार्गवरामः कुठारं स्वाभिमतं परशुमायुधं हित्वा परित्यज्य यथा अचलमनाः

निश्चलहृदयोऽभूत् दुष्टसंहरणे धृतावतारत्वात्त
स्य स्वयं निर्व्यापारोऽअभूदिति भावः तथेति पू
र्वत्रानुषंगः ॥ १९ ॥

अधुना स्वस्यानन्यनिष्ठतां सहेतुकां प्रतिपाद
यन्नाह–

न वै विष्णुं जिष्णुं भयदभुजगाधीश-
शयनं करालव्यालैर्नो गरलगलश-
म्भुं वृततनुम् । नचैवान्यान् देवान्
कठिनकरणान् विह्वलमना भजामि
त्वा हित्वा विमलमचलं निर्भयमहं॥२०॥

Indira Gandhi National
Centre for the Arts

अहं केशवानंदः विमलं विगताविद्यादिजन्य
कलङ्कं सर्वदाऽपि शांतरूपं निश्चलं वा निर्भयं
निर्गतं भयं 'बिभेत्यस्मादिति भयं' भयसाधनं
द्वैतं यस्मादिति निर्भयस्तमद्वैतस्वरूपमिति
भावः । 'द्वितीयाद्वै भयं भवती'त्यादि श्रुतेः ॥
त्वा त्वां हित्वा विहाय जिष्णुं जयनशीलं 'ग्ला
जिस्थश्चग्स्नु'रिति ग्स्नुप्रत्ययः विष्णुं वै निश्चि
तं न भजामि नाराधयामि । कुत इत्यपेक्षा
यां हेतुगर्भं विशेषणमाह । भयदेत्यादि ।भयदः क्रू
रस्वभावत्वाज्जनमारकत्वाच्च भयप्रदो यो भुजगा
धीशः शेषः स एव शयनं यस्य स भुजगाधीशश

यनस्तं । पुनः करालव्यालैरुग्रभुजगैर्वृततनुं वे
ष्टितकायं गरलगलशम्भुं विषकण्ठं शर्वं च नो भ
जामि । तथा कठिनकरणान् दुष्करपरिचरणान्
अन्यान् देवान् इंद्रवरुणकुबेरादींश्च नैव भजामि
दुराराध्यत्वात्तानपि नाराधयामीति फलितोऽर्थः ।
अत्र हि विमलमित्यादि विशेषणत्रयं व्युत्क्रमेण
विष्णवादिभ्यो व्यतिरेकं ध्वनयतीति बोध्यम् । अ
त्र च 'विष्णुं जिष्णुं' 'भयदभुजग' 'गरलगल'मि
त्यादिस्थलेषु आवृत्तवर्णसद्भावादनुप्रासो नाम श
ब्दालंकारः । तथाच विशेषणानां साभिप्रायत्वा
त् समर्थनीयस्य विष्णवाद्यभजनस्य भयदभुजगा
धीशशयनेत्यादि पदार्थैः समर्थनाच्च परिकरकाव्य
लिंगेऽपि परस्परमालिंगयतः ॥ २० ॥ ॥ ॥

अत्र स्वाभीप्सितं निवेदयन् प्रार्थयते——

कदाकांतारेऽस्मिन् जगति भयदं के-
सरिवरम् दयाखड्गं त्वत्तो गुरुवर
समासाद्य मतिमान् । त्रिधा भेदं भि-
त्वा कृशतनुतपस्वी शिशुरहं समा-
धौ वैधात्रं मुखमपि करिष्याम्यणु-
समम् ॥ २१ ॥

हे गुरुवर हे श्रेष्ठगुरो श्रीनानक कृशतनुतपस्वी

कृशा तनुः शरीरं यस्य स तथाभूतस्तपस्वी शिशुः अप्रौढमतिरहम्। अत्रेदं विशेषणत्रयं स्वस्य भेदरूपकेसरिभेदनेऽत्यशक्तत्वं बोधयितुमुपन्यस्तमिति बोध्यम्। अस्मिन् दृश्यमाने जगति कांतारे जगद्रूपे दुर्गमारण्ये त्वत्तो भवतो दयाखड्गं करुणारूपमसिं केसरिहननोपयोगित्वाद्दयायांखड्गत्वमारोप्यते। समासाद्य संपाद्य मतिमान् अपरोक्षज्ञानसंपन्नः सन् त्रिधा भेदं द्रष्टृदृश्यदर्शनादिरूपेण त्रिप्रकारं भेदं तद्रूपं केसरिवरं सिंहश्रेष्ठं भित्त्वा विदार्य समाधौ योगशास्त्रप्रसिद्धे चित्तसमाधानरूपेऽवस्थाविशेषे वैधात्रं विधातुरिदम् 'तस्येद' मित्यण्। सुखं ब्रह्मलोकाधिपत्यरूपमप्यानंदमणुसममति तुच्छं कदा करिष्यामि। समाधिमहासुखलाभेन परमेष्ठिसुखमपि कदा तृणीकुर्यामिति भावः अर्थादिदमेव मेऽत्यभीष्टं त्वत्कृपा तामचिरात् संपादयत्वित्याशयः॥ २१ ॥ ॥ ॥॥

एवमीप्सितं निवेद्य पुनर्वृत्तान्तरमाश्रित्य सद्गुरुं वरप्रदानाभिमुखीकुर्वन् प्रार्थयते—

इति दीनवचो दयानिधे प्रलपन्तं प्र-
लयान्तमाश्रितम्। अधुनापि न मां
समीक्षयन्कुरुषे हा कथमश्ममानसं २२

भो दयानिधे निर्व्याजकरुणासमुद्र श्रीगुरो इत्युक्तप्रकारेण प्रलपन्तं भाषमाणम् । न चासमीक्षमाणे मयि प्रलापाद्विरम्य शरण्यान्तरमयमाश्रयेदिति मनसि निधेयमित्याशयेनाह प्रलयान्तं प्रलयकालपर्यन्तं आश्रितं कृतभवदाश्रयं प्रलयकालेऽपि नाहमनन्यगामी भवेयामित्यात्मनोऽनन्यनिष्ठता प्रोक्ता भवतीत्यर्थः मां अधुनाऽपि अद्यापि न समीक्षयन् कृपापूर्वकं नावलोकयन् हा खेदे त्वं अश्ममानसं पाषाणवन्निर्दयमनः कथं कुरुषे नेदं परमकारुणिकस्य ते समुचितमिति भावः। वियोगिनीवृत्तमिदम् ॥ २२ ॥

पुनरात्मनोऽनन्यनिष्ठामेव प्रदर्शयन् मुक्तिवरं याचमानः सन्नाह—

सततं विनयेन पृच्छते खलु हित्वा
सकलं समृच्छते। इति नो वद गच्छ-
गच्छ मे विमलं मुक्तिवरं च यच्छ मे २३

सकलं ऐहिकमामुष्मिकं च साधनजालं हित्वा परित्यज्य समृच्छते त्वामिति शेषः शरणं प्रपद्यमानायेत्यर्थः तथा च सततं विनयेन विनीततया पृच्छते करुणां कदा करिष्यसीति सप्रत्याशमनुयोगं कुर्वते मे मह्यं गच्छगच्छेतीति शेषः नो

वद मा ब्रूहीत्यर्थः पुनः विमलं निर्दोषं मुक्तिवरं संसारमुक्तिरूपं ममाभिलषितं च मे मह्यं यच्छ देहि। अनन्यनिष्ठस्य विनीतस्य त्वत्त एवाभिलाषपूर्तिकामस्य च मे वाञ्छितमपूरयित्वा निर्यापणं परमदयालोः सर्वान्तरज्ञस्य च तवातीवानुचितमिति भावः॥ २३॥

ननु गच्छेति चेन् न ब्रूयां तर्हि कथमनेकाभिलाषवतस्तवेच्छापूरणं विधेयमित्याकांक्षायामाह—

कनकं नच कान्तकामिनीं नहि वि-
द्यां शतधाऽऽर्तिशामिनीम्। न तु की-
र्तिमशेषगामिनीं करुणां मे परिदेहि
पावनीम्॥ २४॥

कनकं सुवर्णं च पुनः कान्तकामिनीं सुरूपां स्त्रियं मे मह्यं न परिदेहि मा वितर अतदर्थित्वान्ममेतिभावः शतधा बहुप्रकारैरार्तिशामिनीं दुःखनाशकरीं विद्यां न परिदेहि। तथा अशेषगामिनीं सर्वत्रगमनशीलां कीर्तिं ख्यातिं च न देहि। तर्हि किं दद्यामित्याशंकायामाह करुणामिति। पावनीं सकलदुरितहरां त्वत्करुणामेव मे परिदेहि। भवत्करुणामन्तरा नायमन्तरात्मनि किंचित् प्रार्थयत इति भावः॥ २४॥

करुणार्थित्वेऽपि किं प्रयोजनमिति चेत्तत्राह—

अधमादधमं हि दुर्गुणं बहुदुःखैर्ग्रथि-
तं च दुर्दमम्। दलितं दुरिताधिसंगमै-
स्त्वरितं तारय मामतन्द्रितः॥ २५॥

अधमादधमं अत्यधमं दुर्गुणं असद्गुणविशिष्टं बहुभिर्दुःखैर्ग्रथितं संबद्धं पुनः दुर्दमम् यो दुःखेनापि न निगृह्यते तमित्यर्थः दुरितानि फलदानोन्मुखानि पातकानि आधयो मनोदुःखानि च तेषां ये संगमाः प्राप्तयस्तैर्दलितं चूर्णितं बहुपीडितमिति यावत् मां त्वं अतन्द्रितो निरालस्यो भूत्वा त्वरितं द्रुततरं तारय अस्मात्संसारसंकटादुन्मोचयेत्यर्थः॥ २५॥

ननु निवृत्तदुराचरणस्यापराधिनोनुतप्तस्य चापराधः क्षन्तव्य इति न्याय्यमेतत् तव त्वपराधशतानि सततं रचयतः क्षमापनं मय्यन्याय्यमेवाऽऽवहेदितिचेत्तत्राह—

फणिनांवमतां विषानलं किमु गंधं त-
नुते न चन्दनः। अपि मामपराधशा-
लिनं कथमेनं न हि मोचयिष्यसि॥२६॥

विषानलं गरलरूपमग्निं अग्निवत् दुःसहं विषमित्यर्थः वमतां उद्गिरतां फणिनां चंदनः वृक्षविशे

षः गंधं सौरभ्यं किमु न तनुते न रचयति किं अपि तु रचयत्येवेति भावः। हि तद्वदपराधैर्नानाविधदुराचरणैः शालत इति अपराधशाली तं तादृशमपि एनं त्वां प्रपन्नं मां कथं न मोचयिष्यसि दुष्कृतात् कथं न मोक्तासि । अवश्यमेव मोचनीयस्त्वयाऽयमपराध्यपि त्वदेकनिष्ठो मूढजन इति तात्पर्यार्थः ॥ २६ ॥ ॥ ॥

अथ च सर्वथाऽपि मदुद्धारस्त्वदायत्त एवेत्याशयेनाह—

गुरुनानक सूक्ष्ममीक्ष्यतां क्षुधितः
क्षुब्धमना अयं जनः। चरणं शरणं
तवाश्रितः करुणाऽन्नेन हि तोष्यतां
त्वया ॥ २७ ॥

भो गुरुनानक हे नानकाख्य सद्गुरो भवता सूक्ष्मं ईक्ष्यतां पर्यालोच्यताम् । किमित्याकांक्षायामाह क्षुधितइति । क्षुधितः क्षुत्पीडितः अत एव क्षुब्धं मनोऽतःकरणं यस्य स तथाभूतः अयं जनः अहमित्यर्थः तव चरणं शरणं रक्षकं आश्रित इति सूक्ष्माधिया पर्यालोच्यतामिति संबंधः । पर्यालोचनोत्तरंकरणीयमाह करुणेति । त्वया श्रीगुरुणा अयं जनः करुणान्नेन कृपारूपेणान्नेन

तोष्यतां तोषणीय इत्यर्थः केवलं कृपार्थिनो मे भवत्करुणां विना न किमपि संतोषाय भविष्यतीति मनसि निश्चित्य मयि कृपां विधेहीति फलितोऽर्थः ॥ २७ ॥

अधुना तु स्वकीर्तिसंरक्षणार्थमपि त्वया ममाभीष्टमवश्यं पूरणीयमित्याशयेनाह—

मृतिजन्मजरादिसन्ततौ पततो मे
खलु नापचीयते । तव कीर्तिररं हि ही-
यते यदि मे मुक्तिवरो न दीयते ॥२८॥

मृतिः मरणं जन्मजरे प्रसिद्धे ताः आदयो येषु ते मृतिजन्मजरादयः षड्विकाराः अत्रादिशब्देनास्तित्ववृद्धिविनाशा गृह्यन्ते तेषां सन्ततिः प्रवाहपरंपरा तस्यां पततो निमज्जतः मे मम किंचिदिति शेषः खलु निश्चितं नापचीयते न क्षीयते । किंच यदि त्वयेति शेषः मे मह्यं मुक्तिवरो मुक्तिरूपः वरोऽभिलषितं वस्तु न दीयते तर्हि तव कीर्तिः श्रीनानकः प्रणतदीनविमोचक इत्येवंरूपा प्रसिद्धिः अरं अत्यंतं हीयते नश्यतीत्यर्थः हीति पादपूरणार्थम् । 'तुहिचस्म हवै पादपूरण' इत्यभिधानात् । मय्यस्माद्भवपाशादमोचिते नायं नानको मुक्तिदातेति विरुद्धैव ख्यातिस्स्यादिति शीघ्रं वितर मेऽभिलषितमिति भावः॥२८॥

अथ च यदि कमपि त्वं नामोच्चयिष्यस्तर्हि ना हमपि ते निर्बंधमकरिष्यम्। यस्मात् त्वं कांश्चिन्मो चितवानासि तस्मान्मद्विषय एवं वैषम्यं नोचित तमित्याशयेनाह—

बत मन्दमतीन् मया समं भवजाले
पतितांश्च दुःखितान्। ननु मामपहा-
य मोचयन् भजसे। किं विषमो गुरो
दृशम्॥ २९॥

हे गुरो मया समं भवजाले संसारबंधने पति तान् दुःखितान् मन्दमतींश्च जनान् मामपहाय मां विना मोचयन् भवजालादित्यनुषंगः त्वं विष मां दृशं भेददृष्टिं किं भजसे कुतो भजसीत्यर्थः २९

अथ लोकापवादस्य दुःसहतां च विचिन्त्य म य्यनुग्रहोऽवश्यं विधेय एवेति प्रार्थयन्नाह—

नितरां निरयेऽपि सीदतः कठिनं किं
नु ममाश्मचेतसः। इदमेकमसह्यमाप-
तेत् परितस्त्वां जनता यदाऽऽलपेत्॥ ३०

निरये नरकवद्यातनाजालसंकुलेऽस्मिन्भवजा ले सीदतः क्लिश्यतोपि अश्मचेतसः पाषाणसमक ठोरहृदयस्य मम किंनु कठिनं किं दुःसहं न किमपी

ति भावः। तर्हि सहस्व सुखेन निरयसमविषयवेदनादुःखं किमिति मद्याचनेनेति चेत्तत्राह इदमिति। यद्यप्यहं सहिष्णुस्तथापि इदं वक्ष्यमाणं भवन्निंदनमिति यावत् असह्यं सोढुमशक्यं आपतेत् प्राप्नुयात्। किं तदित्याकांक्षायामाह परितः समंततः जनता जनानां समुहो जनता 'ग्रामजनबंधुभ्यस्तलि'ति समूहार्थे तल्प्रत्ययः। त्वां श्रीगुरुमुद्दिश्य यन्निन्दापरं वचनं आलपेत् ब्रूयात् तन्मे सुतरां दुःसहं स्यादिति पूर्वेण संबंधः। अनन्यस्य ममानुद्धारे जगति सर्वेऽपि जनास्त्वां निन्देयुरेवेति मामाशूद्धरास्माद्भवसंकटादित्याशयः॥ ३०॥

स्वस्यानन्यतां परित्यागानौचित्यं च प्रकाशयन्नाह—

विषयानलतापहारिणं भगवंस्त्वाम-
तिशान्तिकारिणम्। अवबुध्य समा-
गतं सरः कथमब्जाक्ष जहासि माम-
लिम्॥ ३१॥

हे भगवन् ज्ञानैश्वर्यादिसंपन्न अब्जाक्ष कमलवदमलनयन श्रीगुरो। विषया एव शब्दस्पर्शादि भोग्यपदार्था एवानला अप्राप्तिविरहादिनिमित्तैरत्यन्तदुरंतसंतापहेतुत्वादग्नयस्तेभ्यो यस्तापस्तं

हरति विनाशयतीति विषयानलतापहारी तं। कुत इत्याकांक्षायामाह अतिशांतिकारिणमिति। अतिशांतिं तापत्रयोपशमं करोति तच्छील इति ताच्छील्ये णिनिः तं त्वां सरः पूर्वोक्तविशेषणसाम्यात् कासाररूपं अवबुध्य मत्वा समागतं प्रपन्नं मामालिं मद्रूपं भ्रमरं त्वदेकनिष्ठमिति भावः कथं जहासि उपेक्षसे मा जहीहीतिभावः ॥ ३१ ॥

ननु निगमांतविचारेण विषयान्निर्विद्य शोकोऽपनेतव्यस्ततो मुक्तिः सुलभैव किं मदंगीकरणेनेत्याशंकामपनुदन् प्रार्थयते—

नितरां निगमो विलोच्यते पुरुपापेन
मया विशोच्यते॥ अथ मे विषयेण रो
च्यते वरदायं वद केन मोच्यते॥ ३२॥

पुरु पुष्कलं पापं भवमुक्तिप्रतिबंधकं दुरितं यस्येतितथोक्तस्तेन मया निगमः वेदवाक्यजालं नितरां अंगाध्ययनादिरूपसंस्कारातिशयपूर्वकं विलोच्यते पर्यालोचनविषयीक्रियते तथापि विशोच्यते मनोग्लान्यादिविशेषपुरःसरं शोकः क्रियते। इह छांदोग्योपनिषत्प्रसिद्धः 'सोऽहं भगवः शोचामि तम्मां भगवाञ्छोकस्य पारं तारयत्वि'त्यादिना सनत्कुमारं प्रति नारदेनानूक्तो मनः संतो

षविरहरूपः शोकोनुसंधेयः नतुदारदारकविरहादि जनितः। अथ च मे मह्यं विषयेण शब्दस्पर्शादिमनोनुकूलवस्तुरूपेण रोच्यते। 'निवृत्तप्रेषणाद्धातो' र्णिचि रूपं रुच्यते इति शुद्धेन तुल्यार्थकं बोध्यम्। विषयो मे रोचत इत्यर्थः विषयानुरागो हि शोकस्य निदानं तस्य सद्भावादुचितमेव विशेषतः शोचनमिति पूर्वोक्तपोषः। भो वरद अभीष्टदायक श्रीगुरो अयमीदृशः सशोको विषयानुरक्तश्चाहं केन विमोच्यते को मां मोचयेदित्यर्थः भवन्तमन्तरेणेति पूरणीयमर्थापत्त्या। यदि त्वं मां न मोचयसि तर्हि न मे मुक्तिं प्रत्याशालवोपि हृदये पदमादधातीति भावः॥ ३२॥

कुत इत्याकांक्षायां स्वकृतं निवेदयन्नाह--

सुकृतं न कृतं कुजन्मना कृतमेवापि
च दुष्कृतं मया॥ करुणाकर किंकरेण
किं कथनीयं कथय त्वमेव मे ॥ ३३ ॥

कुत्सितं पुरुषार्थशून्यत्वान्निंद्यं जन्म यस्य तेन कुजन्मना यद्वा कुत्सिते नश्वरत्वाप्रियत्वादिदोषदूषिते कलेवरे जन्म आत्मतयाऽऽविर्भावो यस्येति तथा तेन देहाभिमानवतेत्यर्थः 'जन्मत्वात्मतया पुंसा'मित्यादिस्मरणात्। मया सुकृतं सदा

चरणं तपोयज्ञादिकं पुण्यकर्मेति यावत् न कृतम्। अपि च दुष्कृतं पातकं कर्मैव कृतम्। अत्र कुजन्मनेति साभिप्रायविशेषणत्वात्परिकरालंकारः। अतः परं हेकरुणाकर कृपानिधे किंकरेण मया किं कथनीयं किं निवेदनीयम् तत्त्वमेव कथय वद। सकलमपि कथ्यमानं मे लज्जाकरमेवेति न वक्तुमुचितं तव च सर्वांतरज्ञत्वान्न किंचिद्वचनेन प्रयोजनमतो मा मां बहुप्रलापयेतिभावः ॥ ३३ ॥ १

अथ दुष्कृतनिधेस्तवोद्धारे कृते मयि वैषम्यमापतेदित्याशकां परिजिहीर्षन्नाह—

कति कामविमोहविव्हला अयि का-
रुण्यनिधे समुद्धृताः। अधुना तव किं
कृपा गता यदिमं सा पतितं न पाति
माम्॥ ३४॥

अयि कारुण्यनिधे अयीति कोमलामंत्रणे करुणैव कारुण्यं चातुर्वण्यादित्वात् स्वार्थे ष्यत्र् तस्य निधिरिव निधिः तत्संबुद्धिः भोः कृपासमुद्र कामः विषयाभिलाषः विमोहः अतस्मिंस्तद्बुद्धिरूपो मतिविपर्ययः ताभ्यां विव्हलाः व्याकुलाः कति जना इति शेषः त्वया कृपालुना न समुद्धृताः संसारसागरान्नोत्तारिता इत्यर्थः अपि तु बहवः समु

कृताः। अथ किमिति चेत्तत्राह अधुना तव कृपा किं गता नष्टा किम्। यद्यतः सा कृपा पतितं इमं त्वदेकनिष्ठम् मां न पाति न रक्षति सांसारिकाद्दुःखादित्यर्थः। यदि वर्तते कृपा तर्हि कथं न मे समुद्धारः क्रियते यदि च नष्टा तर्हि कथं कारूण्यनिधित्वख्यातिरित्युभयतः संदिहानत्वादुचितमेवोभयथाऽपि संभावनमिति दिक्॥ ३४॥

अधुना यशोतिशयलाभार्थमपि ममोद्धारविषये त्वयाऽवश्यं दया विधेयेति प्रतिपादयन्नाह—

सुकृतप्रकृतीन्नरानवन् न हि लोको-
त्तरकीर्तिमान् भवेः। क्रियते मयि चेत्
कृपा त्वया तव कीर्तिर्वद कीदृशी भवेत् ३५

त्वं सुकृतप्रकृतीन् पुण्यशीलान् नरान् अवन् रक्षन् सन् लोकोत्तरकीर्तिमान् अलौकिकयशःसंपन्नः न भवेः न स्याः संभावनायां लिङ्। अथ त्वया मयि कलुषप्रकृतौ चेद्यदि कृपा क्रियते तर्हि तव कीर्तिः कीदृशी भवेद् वद। सर्वलोकाश्चर्यावहा ते सुकीर्तिर्मदुद्धरणेन भवेदित्यर्थः॥ ३५॥

अधुना लोकवृत्तावेक्षणेन च मयि करुणा सुतरां विधेयेत्याशयेनाह—

लघुगर्तगतं जनं जवात् पथिकोप्यु-

द्धरते कृपावशः । भवसागरपातशा-
लिनं ननु पुत्रं किमु नो समुद्धरेः॥ ३६॥

पथिकोपि पान्थोपि कृपावशः सन् लघुगर्ते अल्पविवरे गतं पतितं जनं जवात्त्वरया उद्धरते उद्धरतीत्यर्थः त्वं तु भवसागरे पातेन दुःखितं पुत्रं पुत्ररूपं 'पंचैते पितरः स्मृता' इति स्मृतौ सद्गुरोः पितृत्वोक्तिप्रसिद्धेः शिष्यमित्यर्थः किं नो समुद्धरेः कुतो नोद्धरसीत्यर्थः ननु शंकायां । न ज्ञायते मम मानुद्धारहेतुरितिभावः॥ ३६ ॥

ननु संत्यपरे मतप्रवर्तका देशिकाः स्वानुग्रहेण भुक्तिमुक्तिफलदातारो ब्रह्मेंद्रादयो देववर्गाश्च तत्किं ममैव पृष्ठानुधावननिर्बंधेनेति चेत्तेषां क्षणिकफलदातृत्वात्तेषामनुसरणं त्वदीयत्वेनाभिविष्टस्य ममानन्यनिष्ठमतेरतीव लज्जावहमित्याशयेनाह—

गुरुनानक नामधारणात् त्वमु कूटस्थ-
गुरुर्विभास्यतः । अतिनिश्चलवस्तु
संत्यजंश्चपलान् गन्तुमहं परित्रपे ३७

त्वं गुरुनानकेति यन्नाम तस्य धारणात् अंगीकरणाद्धेतोः कूटस्थगुरुः निश्चलस्वरूपो निर्विकारो वा महांश्च विभासि । नास्ति अनकः चलनहेतुः

प्राणो यस्मिन्निति व्युत्पत्त्या सुखेनैव ज्ञायते ना नकसद्गुरोः कूटस्थत्वं। अत्र प्रथमश्लोकव्याख्या ने दर्शितं नानकशब्दस्यार्थांतरं चानुसंधेयम्।अतः अस्माद्धेतोः अतिनिश्चलं वस्तु परमार्थभूतं त्वां संत्यजन् सन् अन्यान् देशिकदेवतांतराणि गंतुं प्र पत्तुम् शरणीकर्तुमिति यावत् परित्रपे सर्वतो जि ह्रेमि। निश्चलामलसुधाजलधितटनिकटवर्तिनः पिपासातिशयपीडितस्य प्रतिकूलकुल्याऽनुधाव नमिव विफलमिति भावः॥ ३७॥ ॥ ॥

ननु परुषवचनैः कोपितस्य मम कथं तवोद्धा रानुकूल्यं स्यादित्याकांक्षायामाह—

परुषैर्वचनैर्यदि प्रभो तव रोषः समु-
पागतो महान्। तत उद्धर मां दया-
निधे मुखरं संसृतितोतिदुःखितम्॥३८॥

हे प्रभो मम परुषैः कठिनैःवचोभिर्वचनैर्यदि त व महान् रोषः क्रोधः समुपागतः स्यात्ततस्तर्हि हे दयानिधे संसृतितः नानायोनिसंसरणादतिदुः खितं अत एव मुखरं जल्पाकं मां उद्धर समुत्तारय संसृतित इत्यनुषज्यते। नहि सुदुःखितस्य प्रला पा दयालुभिर्मनसि निधातुमुचिताः यदि च ते त व सुदुःसहास्तर्हि मां झटित्युद्धर। ततो नाहं किं

चिदपि प्रलपिष्यामीत्याशयः ॥ ३८ ॥ ॥ ॥

ननु दुराचरणशीलत्वादेवं यातनापरंपराभिः संक्लेश्य पुनः सदाचारप्रवृत्तौ कालेन तत्त्वज्ञानोप देशान्मोचयिष्यामि त्वाममुष्मात् संसरणमहाग र्तादिति चेन्मन्यसे तर्हिं तदपि न न्याय्यमिति लो कवृत्तांतानुवादपुरस्सरं प्रतिपादयति--

प्रथमे वयसि प्रलालितः खलु पुत्रः
क्षमतेऽनु ताडनाम् । न कदाचन ला-
लितः शिशुर्भवताऽयं किमु ताड्यते-
तराम् ॥ ३९ ॥

प्रथमे बाल्ये अनु पश्चात् क्षमते तत्र योग्यो भव ति सहत इति वा । अयं शिशुः अहमित्यर्थः कि मु ताड्यते कुतः संक्लेश्यत इति भावः । अन्यत् सुगमम् ॥ ३९ ॥ ॥ ॥ ॥ ॥

एवं सकरुणवक्रोक्तिभिः श्रीगुरुं बहुविधमुपा लभ्याधुना स्वापराध एव सद्गुरोरौदासीन्ये आत्म नोऽनुद्धारे च हेतुरित्यलं मनसि कृत्वाऽत्मोपालंभ नपूर्वकं तं क्षमापयते युग्मेन--

अहमेव तु पापपंजरः पतितस्त्वां स-
मुपालभे वृथा । धिगिमां मम दोषदू-
षितां मतिमल्पामतिमूढतामिताम् ४०

अहमेव पापस्य पंजरः निवासभूत इति भा
वः न त्वं निर्दयो विषममतिश्चेत्येवकाराभिप्रायः
वृथा समुपालभे निष्कारणं निंदामीत्यर्थः ममेमां
दोषेण दुष्कर्मपरिपाकजनितेन विपर्ययेण मिथ्या
धिक्षेपनिमित्तेनाज्ञानेनेति भावः दूषितां अत ए
वातिमूढतां कर्तव्याकर्तव्यविमोहरूपं इतां प्रा
प्तां अल्पां वैषम्यगृहीतामित्यर्थः मतिं धिक् 'उभ
सर्वतसो'रित्यादिना द्वितीया ॥ ४० ॥ ॥

कटुभाषणमर्भकस्य मे भगवंस्ते न
तनोतु वै क्रुधम् । कुपितस्य सुतस्य
भाषणं न च गृह्णंति मनाङ् महाश-
याः ॥ ४१ ॥ ॥ ॥ ॥

हे भगवन् ज्ञानैश्वर्यादिसंपन्न श्रीगुरो अर्भक
स्य बालस्य मे कटुभाषणं सोपालंभत्वात् कर्तृ ते
तव क्रुधं क्रोधं न तनोतु मा करोतु । मदीयोपालं
भेन मा मह्यं कुप्येत्याशयः कुत इत्याकांक्षायाम
र्थान्तरं न्यस्यन्नाह कुपितेति । महाशयाः उदारचि
त्ताः मनाक् ईषदपि न गृह्णंति सत्यत्वेन न
जानंतीत्यर्थः । स्पष्टमन्यत् ॥ ४१ ॥ ॥

एवं श्रीगुरुं क्षमाप्य तं स्वोद्धारप्रवृत्तं च विज्ञा
य प्रमोदपूर्णहृदयो वरदं श्रीनानकं स्तुवन्नाह—

वेदार्थसारं सरलं धरंतं ग्रंथे गभीरेऽ
ल्पमतीनवंतम्। कारुण्यवंतं च ज-
निं हरंतं श्रीनानकं नौमि समुद्धर-
न्तम्॥ ४२॥ ॥ ॥

गभीरे गंभीरार्थके ग्रंथे गुरुग्रंथे वेदार्थानां ऋगादिवेदचतुष्टयाशयानां सारं तात्पर्यभूतमभिधेयं सरलं यथातथा देशभाषानिबद्धत्वात्तस्य निबंधस्येत्याशयः धरंतं संगृह्णंतं। कुतोऽयं प्रयास इति चेत्तत्राह अल्पमतीनवंतं गीर्वाणवाणीपरिचयशून्यानपि वेदाशयज्ञापनेन समुद्धर्तुकाममिति भावः। प्रथमश्लोकद्वितीयपादस्यैवायं विस्तर इति बोध्यम्। कारुण्यवंतं परमकारुणिकं। कुत इत्यत आह जनिं पुनर्जन्मपरंपरां हरंतं। अत एव समुद्धरंतं संसारसंकटान्मोचयंतं श्रीनानकं सद्गुरुं नौमि स्तौमि॥ ४२॥ ॥ ॥ ॥ ॥

पुनस्तमेव श्रीनानकं तद्वितिवृत्तैकदेशनिर्देशपुरःसरं स्तौति—

सिद्धान् समृद्धान् जगति प्रसिद्धान्
सर्वाञ्जयन्तं शतशक्तिमन्तम्॥ यो-
गींद्रमित्रं परमं पवित्रं श्रीनानकं नौ-
मि गुरुं विचित्रम्॥ ४३॥ ॥

समृद्धान् अणिमादियोगसिद्धिभिः संपन्नान् सिद्धान् गोरक्षप्रभृतीन् योगेश्वरान् जयंतं पराजितवंतं । गोरक्षादिभिः सिद्धैः साकं श्रीगुरुनानकस्य संवादः सिद्धगोष्ठीत्यभिधानात् प्राकृतप्रकरणात् जन्मसाक्षीत्यभिधात्प्राकृतग्रंथान्नानकचंद्रोदयादेववाणिनिबद्धान्निबंधाच्च सविस्तरं बोध्यः । शतशक्तिमंतं अनंतसिद्धिसामर्थ्यधारिणं गोरक्षादीनां पराभवार्थं नानाविधं योगसामर्थ्यमाविष्कुर्वंतमित्यर्थः । योगींद्राणां मित्रं हितोपदेष्टृत्वात् । बहुव्रीहिर्वा विधेयः । विचित्रम् बहुविधचमत्कारप्रदर्शकमिति भावः । गुरुं नौमीत्यादि पूर्ववत् ॥ ४३ ॥ ॥ ॥ ॥ ॥

अत्र श्रीनानकगुरोरेकांतवासप्रियत्वं वर्णयन् वंदते—— ॥ ॥ ॥ ॥

कांतारभूमौ मुहुरारमंतं सङ्घे सुखं
नेति सुदर्शयंतम् ॥ चित्तं समाधावम-
ले वहंतं वंदे गुरुं नानकनामवंतं॥ ४४

कांतारं । दुर्गमारण्यं तस्य भूमौ मुहुः सदेत्यर्थः आरमंतं 'व्याङ्परिभ्योरम' इतिसूत्रेण रमेः परस्मैपदम् सर्वप्रकारेण तुष्यंतमित्यर्थः तेन च स्वाचारेण संघे जनसमूहसन्निवासे इति यावत् सुख

पारमार्थिकं चित्तसंतोषहेतुक आनंदो नास्तीति सु दर्शयंतं जने स्वाचारेण प्रकटयंतं। अमले विक्षेप कषायादिमलरहिते समाधौ निर्विकल्पासंप्रज्ञा तादिशब्दवाच्ये समाधौ एकाग्रतापरिणामत्वेन पतंजल्युक्तस्वरूपे चित्तं वहंतं धारयंतम्। नानकेति प्रशस्तं नामास्यास्तीति तं गुरुं वंदे । अभिवा दये ॥ ४४ ॥ ॥ ॥ ॥ ॥

अथ स्वाभीप्सितं निर्दिशन्नाह--

एतं वरं नानक याचयामि नान्यं वदा-
न्याधिप ते वदामि॥ यत्रैव यत्रैव पदं
त्वदीयं तत्रैव तत्रैव मनो मदीयम्॥४५॥

भोः नानक त्वामिति शेषः एतं वक्ष्यमाणं वरं याचयामि अर्थये। हे वदान्याधिप दातृश्रेष्ठ ते तु भ्यं अन्यं वक्ष्यमाणातिरिक्तं न वदामि देहीति न ब्रवीमीत्यर्थः। कोसौ वर इति चेत्तमाह यत्रैवेति। अत्रैवकारो वाक्यालंकारार्थः नतु व्यवच्छेदार्थकः यत्रयत्र त्वदीयं पदं चरणः वर्तते तत्रतत्रव मदी यं मनोऽस्तु। आदराद्वीप्सा। सर्वदा मे मनसस्त्व च्चरण एव निवासो भवत्विति भावः। इदमिंद्रव ज्रावृत्तं। तल्लक्षणं तु 'ताविन्द्रवज्रा जगगा निरुक्ते' ति बोध्यम्॥ ४५॥

अथ स्वमनसः श्रीनानकसद्गुरावेव रतिं प्रति
पादयिष्यन् आत्मनि तदनुग्रहं च संभावयन्सर्वे
न्द्रियाणामपि तत्परतां प्रार्थयमानो वसन्ततिल
कावृत्तमाश्रित्य श्रीगुरुं स्तोष्यन्नाह—

भेजे सदा मम मनो गुरुनानकं तं रेजे
मदीयमनसि प्रभुरेकनाथः ॥ गर्ताद्
भवाद् यदि गुरुर्ननु नोद्धरेन् मां तर्हि
प्रभुं किमु भजिष्यति कोपिदक्षः ४६

मम मनः मानसं कर्तृ गुरुनानकं भेजे अभज
दित्यर्थः भजनहेतुभूतायाः सद्गुरुनिष्ठायाः जन्मा
न्तरसंस्कारकारणत्वात्तस्य च संप्रति परोक्षत्वाद
त्र लिटः प्रयोगः स च प्रभुरेकनाथःएकः अद्वितीयः
श्रीगुरुरेव नाथः स्वामी मदीयमनसि रेजे आवि
र्बभूवेति भावः। मदिच्छापूरणाय मां भवाब्धेरुद्ध
र्तुं च मम हृदये प्रकटीभूत इति भावः। युक्तमेव
कृतं तेन श्रीनानकेनान्यथा कीर्तिभंगभयमभवि
ष्यदित्याशयेनाह गर्तादिति।गर्ताद् भवात् संसार
गर्तादित्यर्थः दक्षः विद्वान् भजिष्यति किमु सेवि
ष्यते किं नैव सेविष्यत इत्यर्थः। अधुना मामु
द्धराति श्रीगुरुनानके सकलोपि तद्भजनसंप्रदायो
ऽविच्छिन्नो जगति प्रचुरः प्रचलेदित्याशयः॥४६॥

एवमनुग्रहाभिमुखं श्रीगुरुं ज्ञात्वा तमभिवा दयन्नाह—

शान्तं शिवं शमलहं शशिसन्निभाभं
योगे नियुक्तमनसामपि सारलाभं।
चेतश्चमत्कृतिपदं च चिरंतनं तं वन्दे
गुरुं गिरिगुहासु समाविशन्तम् ॥ ४७॥

अहं तं प्रसिद्धं गुरुं श्रीनानकं वन्दे इत्यन्वयः। कीदृशमित्यपेक्षायामाह। शान्तं अक्षुब्धहृदयं शिवं मंगलरूपं शमलानि पातकानि हंतीति शमलहस्तं अत्र हंतेर्डः प्रत्ययः। शशिसन्निभाभं शशिना चंद्रेण संनिभा तुल्या आभा कांतिर्यस्य स तं। अतिशांताल्हादकस्वभावमित्यर्थः योगे अष्टांगयोगे वियुक्तमनसां निविष्टहृदयानामपि सारस्य ब्रह्मात्मानुभवलक्षणसुखस्य लाभः यस्मात्तं। पुनश्चेतसः चमत्कृतिपदं आनंदसदनं। चिरंतनं वास्तवस्वरूपेण ब्रह्मादिभ्योपि पुरातनमित्यर्थः गिरिगुहासु पर्वतद्रोणीषु समाविशंतं प्रविश्य तिष्ठंतं विविक्तप्रियमिति भावः॥ ४७॥

एवं सद्गुरुमभिवाद्येदानीं तद्भजने चित्तेंद्रियाणि प्रार्थयन्नाह—

रे चित्त चिन्तय चिरं चरणारविन्दं

श्रीनानकस्य विमलं शरदिन्दुशोभं।
संसारतापपरितप्तमहं सखे त्वां सत्यं
ब्रवीमि सततं भज तापहारम्॥ ४८॥

शरदिन्दोः शारदचन्द्रस्य शोभेव शोभा यस्य तं प्रणताल्हादकमित्यर्थः हे सखे चित्त संसारतापपरितप्तं इति त्वामित्यस्य विशेषणं। सत्यमिदं ब्रवीमि। किं तदित्याकांक्षायामाह तापहारं सकलसंसारतापनिवर्तकमित्यर्थः गुरुं भजेति॥ ४८॥

ज्ञानेंद्रियाण्यविरतं भवभीतिभित्त्यै
भाव्यो भवोद्भवभयोद्भिदयं गुरुर्नः।
कर्मेन्द्रियाणि भजत प्रभुमेव यूयं नो
चेद् भवे भ्रमणमेव हि संभवेद्वः॥४९॥

भोः ज्ञानेंद्रियाणि हे चक्षुः श्रोत्रादीनि भवभीतेः भित्त्यै नाशाय भवोद्भवभयोद्भित् भवसंभवमहाभयभेदकः अयं बुद्धिनिष्ठः नः गुरुः अस्मद्देशिको नानकाचार्यः अविरतं अजस्रं भाव्यः उपासितव्यः। अन्यत् स्पष्टम्॥ ४९॥

अधुना मुख्यं स्वमनीषितं याचते —

ईशान हे किमपि याच्यमिदं मदीयं
ह्याकर्णयाद्य गुरुनानक भावणीयम्।

त्वं जन्म मे यदि ददासि कृषीवलानां
दद्यास्तथापि भजतां मम मानसं त्वां ५०

हे ईशान सर्वनियामक गुरुनानक इदं उच्य मानं याच्यं याचनीयं वस्तु किंचिद् भाषणाय भाषितुं योग्यं अस्ति तदाकर्णय शृणु। किंतदि त्याकांक्षायामाह त्वंजन्मेति। कृषीवलानां शूद्रा णां जन्म मे यदि ददासि दास्यसीत्यर्थः। वर्तमा नसामीप्याद् वर्तमानवन्निर्देशः तर्हि दद्याः परंतु मम मानसं त्वां भजतां त्वदेकाग्रमेव भवत्वि त्याशयाः। कृषीवलकुलमपि त्वय्यचलविमलमा नसस्यमे न कमपि कलंकमावहेदिति भावः॥५०॥

अत्र प्रार्थनान्तरमभिधत्ते——

गंगातटे परिवसन् भवबन्धमुक्तः सक्त
स्तथाऽपि भवतश्चरणारविन्दे। भि-
त्वा ततो गुरुगुरो पुरुकर्मरेणून् मग्नः
कदाऽमृतमये जलधावहं स्याम्॥५१॥

भो गुरुगुरो देशिकश्रेष्ठ गंगायास्तटे तीरे परि वसन् सर्वतो वसन् अत्यन्तमावासकर इति या वत् ततः तीर्थनिवाससुकृतेनेत्यर्थः पुरून् बहुवि धजन्मजालहेतुत्वात् पुष्कलान् कर्मरेणून् कर्मरू पान् रेणून् बहुत्वेप्यल्पफलत्वात् रेणुत्वारोपः कर्म

सु समीचीनः भित्त्वा आत्मनो भोक्तृभोग्यादिक
ल्पनामलासंलिप्तस्याकर्तृसाक्षित्वरूपेण बोधात्
विनाश्यभर्जितधानाबीजानीव निष्कामत्वाज्ज
न्मांतरांकुरोत्पादनासमर्थानि विधायेत्यर्थः भवबं
धात् चिज्जडग्रन्थिरूपसंसारजालबन्धनाद् मुक्तः
तेनैवात्मनो याथात्म्यज्ञानेन 'बद्धो मुक्त इतिव्या
ख्या गुणतो मे न वस्तुत' इति दृढानुभवान्
मुक्तप्रायइवेत्याशयः तथापि भवतः श्रीगुरोश्चर
णारविन्दे पादकमले सक्तः अनुरक्तः सन् अमृतम
ये जलधौ अपरिमिताविनाशिपरमानन्दजलसं
दोहसंपूरिते सत्यज्ञानानंतादिपदोपलक्षिते परमा
त्मनि मग्नः अहंवृत्तिपरित्यागेन तदेकमयः कदा
कस्मिन् काले स्यां भवेयम्। इयं चापरा मत्प्रार्थ
ना संपूरणीया श्रीगुरुभिरिति भावः ॥ ५१ ॥

अथ द्विपंचाशत्तमे पद्ये वाक्सान्त्वनमिषेण स्व
कृतेः श्रीनानकसद्गुरुनिवेदनं ध्वनयंस्तस्याः सद्गु
रुसन्तोषहेतुत्वं च युक्त्या प्रतिपादयन्नाह—

मद्वाणि मा भज विषादमरिन्दमो मे
श्रीनानको गुरुवरः कविशब्दजालैः।
नालंकृतैर्भवति तुष्टतमः कदापि प्री
त्यैव तुष्यतितरां खलु भावसाक्षी ५२

हे मद्वाणि हे मदीयकविते । विषादं गुणालंकारादिविरहसमुत्पन्नं खेदं मा भज। कुत इत्यत आह अरिन्दमइत्यादिना। अरीन् कामक्रोधादीन् दमयति निगृह्णातीत्यरिन्दमः श्रीनानकः पूर्वं उक्तस्वरूपत्वादेतन्नामविशिष्टः मे गुरुवरः अलंकृतैरलंकारविशिष्टैः कवीनांशब्दजालैः तुष्टतमः अतिशयेन तुष्टः 'अतिशायने तमबिष्ठना'विति तमप्प्रत्ययः। कदापि न भवति। किंतु भावसाक्षी अंतःकरणसाक्षी सर्वप्राणिहृदयस्थितत्वात् सकलांतरज्ञानसंपन्नः सः प्रीत्यैव परमानुरक्तिरूपया चित्तवृत्यैव तुष्यति। अतोलंकारादिविहीनस्यापि श्रीमदाचार्यैकप्रवणतया मया विरचितस्यास्य काव्यस्य संभाव्यते सद्गुरुसंतोषहेतुत्वमिति भावः अत्र हि कविनाऽत्मनः कवित्वाहंकारपरिहारो ध्वन्यते इति बोध्यम्॥ ५२ ॥ ॥

अथान्तिमेन पद्येन प्रकृतलहर्याः पठनजन्यं फलं श्रावयन्नुपसंहरति—

गुरुनानकतुष्टिकरां लहरीं य इमां
सततं प्रपठन्ति जनाः। मृतिजन्मज
रादिभयं न भवेऽनुभवन्ति च ते परि-
यन्ति परम्॥ ५३ ॥

इमां गुरुपीयूषलहरीं एतन्नाम्ना प्रसिद्धमिमं निबंधमित्यर्थः ये पठंति अत्र पठनमुपलक्षकं श्रवणादेरपीति ज्ञेयं ते भवे संसारे मृतिजन्मजरादिभ्यो भयं नानुभवंति । परं परमेश्वरं च परियंति सर्वभेदकलंकपरिहारेण प्राप्नुवंतीति भावः । इदं तोटकवृत्तं तल्लक्षणं तु 'सचतुष्टययुक् खलु तोटकक' मित्यादि बोध्यम् ॥ ५३ ॥ ॥

इतिश्रीमदुदासीनशिरोवंतसपरमहंसगौरदासचरणाम्बुजदासकेशवानन्दयतिनिर्मिता श्रीगुरुपीयूषलहरीसमाप्ता ॥

Indira Gandhi National Centre for the Arts

इतीत्यादिना प्रकरणसमाप्तिं द्योतयति । उदासीन इति सांप्रदायिकं नाम श्रीगौरदासेति ग्रंथकर्तुर्दीक्षागुरोर्नाम । केशवानन्दयतीति स्वनामोल्लेखः श्रीगुरुपीयूषलहरीति ग्रंथसंकेतः । समाप्तो ह्ययं व्याख्यातव्यः श्रीगुरुपीयूषलहरीनामकः सद्गुरुस्तवात्मकस्त्रिपञ्चाशत्पद्यसंमितो निबंध इत्यर्थः । ओं तत् सत् ॥ ॥ ॥ ॥

विद्वत्समागमसुपर्वणि तोषहेतुः संदर्शनाच्च तिमिरं विनिवारयन्ती ॥ श्रीनानकस्तुतिसुधांबुनिधेर्लहर्यामिन्दुप्रभा सुरुचिरा चिरमुच्चकास्तु ॥ १ ॥ ॥ ॥

रंगा यस्य जनन्यनन्यहृदया पत्यावप-
स्याहृता राजारामसुतोत्तमः स मतिमान्
यस्यैकनाथः पिता। विप्रश्रेष्ठवसिष्ठवंशज-
ननो यः श्रीधरस्याग्रजो योगानन्दपदानु
गः स समधादिन्दुप्रभां वामनः॥ २॥
श्रीकेशवानन्दयतीन्द्रवाचा प्रोत्साहितेना
ल्पधिया मया यत्। व्याख्यातमेतत् स
दसद्यथा स्याच्छ्रीनानकस्तेन ममापि तु
ष्येत्॥ ३॥ ॥ ॥ ॥

इति श्रीमद्ब्रह्मनिष्ठकुलवरिष्ठश्रीवसिष्ठकुल संभूतश्रीमदेकनाथज्येष्ठसूनोः श्रीमद्योगानन्दच रणारविन्दद्वंद्वमिलिन्दायमानमानसस्य क्षीरसाग रोपनाम्नो वामनस्य कृतिः श्रीमत्पंडितकुलेन्दु केशवानन्दयतीन्द्रविरचितश्रीगुरुपीयूषलहरीव्या ख्येयमिन्दुप्रभाख्या समाप्तिमगमत्। ॐ नमः श्री गुरुभ्यः॥

---

समाप्तैवं सटीका गुरुपीयूषलहरी.

# अथ श्रीगुरुनानकाष्टकम्

प्रभुंब्रम्हशब्दंदिशंतंदुरंतं ॥ स्वयंस्वेच्छयादिव्यदे
हंधरंतम् ॥ शिवंशांतरूपंजगत्पालयंतम्॥भजेब्रह्म
रूपंगुरुंनानकंतम् ॥ १ ॥ अजंकंजनेत्रंदधानंतुरी
यं ॥ प्रसन्नंप्रपन्नार्तिहंसेव्यदेवम् ॥ हरिंज्ञानरूपंशु
भंचित्प्रकाशं ॥ स्तुवेवेदवेद्यंगुरुंनानकंत्वाम् ॥ २ ॥
अनंतदेवनायकंप्रसिद्धसंप्रदायकं ॥ कृतांतभीति
मोचनंप्रवृद्धबोधलोचनम् ॥ विचित्रसिद्धिसागरं
स्वभक्तमोक्षनागरं ॥ नमामिपालकंविभुंसुखंसुना
नकंगुरुम् ॥ ३ ॥ पदाब्जलीनदीनहीनदिव्यसौ
ख्यदायकं ॥ भवाब्धितापनाशकारिसर्वविश्वनाय
कम् ॥ विशालमोहघातकंस्वरक्तपक्षपातकं ॥ भ
जामिनानकंगुरुंस्तवानिनानकंहरिम् ॥ ४ ॥ अनं
तेऽद्यानंतंपरमविमलंसच्चिदभयं ॥ सदापूर्णानंदं
जनिमृतिहरंसंसृतिपरम् ॥ निराकारंमायाधृततनु
मपारंमुनिनुतं ॥ नमामस्तंनित्यंपरमफलदंनान
कगुरुम् ॥ ५ ॥ निराधारंसत्यंनिखिलजनसेव्यंगुरु
वरं ॥ विहंतारंविश्वंविदलितमिदंपूज्यमचलम् ॥
अखंडंनिःसंगंभवभयहरंवेदविदितम् ॥ नमामस्तं
नित्यंपरमपददंनानकगुरुम् ॥ ६ ॥ नमेधर्माचारः
क्षणमपिनचोपासनविधिः ॥ क्वाब्रह्मज्ञानंनपुनर

Indira Gandhi National Centre for the Arts

नुशोकोद्दढतरः ॥ अतस्त्वत्पादैकाश्रयणवशगो दुःखिततनुः ॥ भजेऽहंतंनित्यंकलिमलहरंनानक गुरुम् ॥ ७ ॥ श्रितानामज्ञानाद्विविधदुरितानांप्रद हने ॥ प्रगल्भाःसेवाद्यैःकतिचनसुराःसन्तिजगति ॥ स्वबुद्ध्यापापौघात्त्वमपरिचितात्तारयविभो ॥ न तोऽतस्त्वांनित्यंपरमवरदंनानकगुरुम् ॥ ८ ॥ इदं सुनानकाष्टकंत्रिवारमेवयेयदा ॥ पठन्तितेचसंततं नयन्तिस्वर्गतिंतदा ॥ अलभ्यरूपमुक्तिदंविशुद्धधा मगौरवं॥पुनश्चतेनरानवैविलोचयन्तिरौरवम् ॥९॥ इतिश्रीमदुदासीनवर्यश्रीनानकप्रकाशशिष्यफुल्ल प्रकाशशिष्यरामप्रकाशेनविदुषाश्रीगौरदासच्छा त्रेणतदीयकृपापात्रेणविरचितंश्रीगुरुनानकस्तो त्रंसमाप्तम् ॥ शुभंभूयात् ॥

IGNCA RAR
ACC. No. R-517

इति

इन्दुप्रभाभासिता

# गुरुपीयूषलहरी

समाप्ता